CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

K. K. Sharma Guild
6.3.81

अस्याः सर्वेऽधिकारा राजशासनानुसारेण प्रकाशकेन स्वायत्तीकृता

B-1

* भाषाटीकासहिता *

* प्रेत मंजरी *

टीका.—स्व० पं० वायुनन्दन मिश्र

* प्रारम्भ *

मास्टर खेलाड़ीलाल शीतलप्रसाद
संस्कृत पुस्तकालय, कचौड़ीगली, वाराणसी-१

मूल्य १२)-

मुद्रक—मास्टर प्रिण्टिंग वर्क्स, बुलानाला, वाराणसी ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2



Kirtikant Sharma Collection, Najafgarh

❀ श्रीगणेशाय नमः ❀

पण्डित-श्रीवायुनन्दनमिश्रप्रणीता

अथ प्रेतमञ्जरी प्रारभ्यते

[भाषाटीकासहिता]

संसार के बीज कारणस्वरूप हयग्रीव भगवान् को नमस्कार करके वायुनन्दन मिश्र इस पद्धति की रचना करते हैं ॥ १ ॥ नाना प्रकार के स्मृति-निबन्धों और बुद्धिमानों के मत को देख कर, बालकों के बोध के लिए उत्तम प्रेतमंजरी

नमस्कृत्य हयग्रीवं जगत्कारण-कारणम् । वायुनन्दनमिश्रेण रच्यते प्रेतमञ्जरी ॥ १ ॥ नाना-स्मृतिनिबन्धानां मतमालोक्य धीमताम् । लिख्यते बालबोधाय प्रेतमञ्जर्यनुत्तमा ॥२॥ अथ प्रेताधिकारिणः कथ्यन्ते । पुत्रः पौत्रः प्रपौत्रो वा भ्राता वा भ्रातृसन्ततिः । सपिण्डसन्ततिर्वाऽपि क्रियार्हो नृप ! जायते ॥३॥ तेषामभावे सर्वेषां समानोदकसन्ततिः । सपिण्डत्वं तु पुरुषे सप्तमे विनिवर्त्तते ॥४॥

लिखते हैं ॥ २ ॥ पहिले प्रेतक्रिया के अधिकारियों को बतलाते हैं—पहिला अधिकारी पुत्र है, इसके अभाव में पोता, यह भी न हो तो परपोता, यह भी न हो तो भाई या भतीजा, इनके भी न होने पर सात पीढ़ी तक की कोई सन्तान अधिकारी होता है ॥ ३ ॥ इन सब के अभाव में चौदह पीढ़ी तक की सन्तान अधिकारी है । सपिण्डत्व ७ पीढ़ी तक लिया

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

जाता है ॥ ४ ॥ और समानोदकभाव १४ पीढ़ी तक है। पिता का पिण्डदान और तिलांजलि पुत्र करे ॥ ५ ॥ पुत्र के अभाव में स्त्री करे। वह भी न हो तो सगा भाई करे। नष्ट कुल वालों और परित्यक्त बन्धुओं का राजा करावे ॥ २ ॥ मनु भगवान् कहते हैं कि पिता के मरणकाल के समय यदि पुत्र समीप न हो तो दूसरा कोई दस दिन की क्रिया कर दे, लेकिन सब क्रिया कभी न करे ॥ ७ ॥ मृतक की क्रिया तीन प्रकार की होती है—(१) प्रथम, (२) मध्यम और

समानोदकभावस्तु निवर्त्तेताचतुर्दशात्। पितुः पुत्रेण कर्तव्या पिण्डदानोदकक्रिया ॥ ५ ॥ पुत्राभावे तु पत्नी स्यात् पत्न्यभावे सहोदरः। उच्छिन्न-त्यक्तबन्धूनां कारयेदवनीपतिः ॥६॥ (तथा मनुः)—पित्रोर्मरणकाले तु न चेत् स्यात्सन्निधौ सुतः। अन्यः कुर्याद्दशाहं च न च सर्वे कदाचन ॥७॥ ततो मृतस्य त्रिविधा क्रिया भवति। प्रथममध्यमोत्तमाः। ततः षट्पिण्डादारभ्य दशाहान्तं मलिनषोडशी। इति प्रथमा क्रिया। विष्ण्वादिप्रेतान्तमध्यषोडशी, इति मध्यमा क्रिया। आद्यश्राद्धादारभ्य सपिण्डनान्ता उत्तमा क्रिया। (केचित्तु दाहादारभ्याऽशौचान्तदिनपर्यन्ता पूर्वा क्रिया। एकादशाहादारभ्य

(३) उत्तम। इसमें छः पिण्ड घर से लेकर श्मशान तक, दश पिण्ड दशवाँ तक मलिन षोडशी नामवाली प्रथम क्रिया होती है। विष्ण्वादि से विष्णुपर्यन्त ग्यारह ११ पिण्ड ब्रह्मादि प्रेतान्त पाँच पिण्ड तक मध्य षोडशी नामवाली मध्यम क्रिया होती है और एकादश से लेकर सपिण्डनान्त तक उत्तमक्रिया होती है। कोई-कोई आचार्य दाहकर्म से लेकर अशौचान्त दिन (दशवाँ) तक पूर्व क्रिया, एकादशाह से लेकर सपिण्डनान्त तक मध्यम क्रिया और सपिण्डन के बाद

Kirtikant Sharma Collection, Najafgarh
CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

सांवत्सरिक (साल भर का पिण्ड) पार्वण, आभ्युदयिक (नान्दीश्राद्ध), नित्य श्राद्ध आदि को उत्तर क्रिया बतलाते हैं। इसमें औरस आदि तेरह प्रकार के पुत्रों का अधिकार है। उन तेरह प्रकार के नाम ये हैं—(१) औरस, (२) पुत्रिका-पुत्र (नाती), (३) क्षेत्रज, (देवरादि से उत्पन्न पुत्र), (४) कानीन, (अविवाहित कन्या के पितृगृह में उत्पन्न पुत्र), (५) सहोढज (गर्भवती कन्या के विवाह होने पर उत्पन्न पुत्र), (६) गूढ़ोत्पन्न (गुप्त रीति से उत्पन्न पुत्र), (७) पुनर्भू पुत्र

सपिण्डनान्ता मध्यमा क्रिया। सपिण्डनाऽनन्तरं सांवत्सरिक-पार्वण-ऽऽभ्युदयिक-नित्यश्राद्धादिरूपोत्तरा क्रिया) तत्र औरसादि-त्रयोदशपुत्राणामधिकारः। ते च त्रयोदशपुत्राः। औरसः १, पुत्रिका-पुत्रः २, क्षेत्रजः ३, कानीनः ४, सहोढजः ५, गूढोत्पन्नः ६, पौनर्भवः ७, अपविद्धः ८, दत्तकः ९, क्रीतः १०, कृत्रिमः ११, स्वयमुपगतः १२, पारशवः १३, तेषु मुख्यः औरसः। तदभावे पुत्रिकापुत्रः। ततः पूर्वपूर्वाभावे उत्तरोत्तराधिकारी। एषां त्रयोदशपुत्राणां लक्षणम्। ततः प्राणप्रयाणसमये वैतरणीनदीतरणकामः स-वत्सगोदानं कुर्यात्। तस्य विधिः। तत्र सन्निकृष्टमरणं

(विधवा होने पर अन्य से उत्पन्न पुत्र), (८) अपविद्ध (नाल सहित प्राप्त पुत्र), (९) दत्तक (गोद लिया हुआ पुत्र), (१०) क्रीत (खरीदा हुआ पुत्र), (११) कृत्रिम (पुत्र के गुणों से युक्त मान लिया गया पुत्र), (१२) स्वयं उपगत (खुद अपने यहाँ आकर रहनेवाला पुत्र), (१३) पारशव (शूद्र-स्त्री से उत्पन्न पुत्र)। इन तेरह प्रकार के पुत्रों में मुख्य औरस पुत्र है, उसके अभाव में नाती, उसके अभाव में क्रमश. बाद वाले अधिकारी होते हैं।

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2
Kirtikant Sharma Collection, Najafgarh

इन तेरह प्रकार के पुत्रों का लक्षण समाप्त। मरने के समय वैतरणी नदी पार होने के निमित्त बछड़े सहित काली गौ का दान करे [उसकी विधि बतलाते हैं] मृत्यु को नजदीक जानकर गोबर से लिपी हुई और कुश बिछाई हुई जमीन पर उत्तर की ओर शिर कर दाहिने हाथ में कुश लेकर वैतरणी नदी पार होने के लिए गौदान करे। तब पूर्व मुख आचमन करके देवता और ब्राह्मणों की पूजा कर, तीन कुशों को लेकर 'अद्य० अमुकगोत्रः०' इत्यादि

ज्ञात्वा। गोमयोपलिप्तायां भूमौ कुशैराच्छादितायां तदुपरि उत्तरशिरस्कां निदध्यात्। दक्षिणहस्तेन कुशं नीत्वा वैतरणीतरणाय गां दद्यात्। तत्र प्राङ्मुखः कृताऽऽचमनः देव-ब्राह्मणान् सम्पूज्य कुश-त्रयमादाय। अद्येत्यादि अमुकगोत्र अमुकशर्माऽहम् अमुकगोत्रस्य पितुरमुकशर्मणः वैतरणीनदी-तरणकामः इमां कृष्णां गां स-वत्सां रुद्रदैवतां यथाऽलङ्कारसहिताम् अमुकगोत्रायाऽमुकशर्मणे ब्राह्मणाय तुभ्यमहं सम्प्रददे। दक्षिणादानम्। कृतस्य कृष्णागोदानकर्मणः साङ्गतासिद्ध्यर्थं दक्षिणाद्रव्यम् अमुकगोत्रायाऽमुकशर्मणे ब्राह्मणाय तुभ्यमहं सम्प्रददे। उभयस्थाने ॐ स्वस्तीति पठेत्। प्रार्थना। उष्णे वर्षति शीते वा मारुते वाति वर्षति। दुर्गं तारयते यस्मात्तस्माद् वैतरणी स्मृता॥ यमद्वारे पथे घोरे घोरां वैतरणीं नदीम्। तर्तुकामः प्रयच्छामि कृष्णां वैतरणीं च गाम्॥

वाक्यों को पढ़े। (दक्षिणादान) 'कृतस्य०' यह वाक्य पढ़कर, दक्षिणा दे। ब्राह्मण दोनों स्थानों पर 'ॐ स्वस्ति' ऐसा कहे। (प्रार्थना) तब 'उष्णे वर्षति०' इन श्लोकों को पढ़े। तब पुत्र आदि अधिकारी मुर्दे को प्राण रहित जान कर

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

जलावें। (अब दाहक्रिया बतलाते हैं)—मुर्दे के शरीर को मिट्टी और जल से धोकर उस नहाये हुए शव के अङ्गों में सात सोने के टुकड़े रखे। उसका क्रम बतलाते हैं। १ मुँह में, २ कान में, २ नेत्र में, २ नाक में—इस प्रकार सातों छेदों में सोने के टुकड़ों को रखकर अथवा केवल मुख में रखे। नाखून, बाल और दाढ़ी-मूँछ बनवा दे, कपड़ा पहिनावे, जनेव

ततो पुत्राद्यधिकारी गतप्राणं शवं ज्ञात्वा दहेत्। तत्र दाहप्रक्रिया। ततो गतप्राणस्य मृत्तिका-तोयाभ्यां देहं प्रक्षाल्य स्नापितस्य सप्तकनकखण्डानि विन्यसेत्। तत्र क्रमः। एकं मुखे कर्णद्वये नेत्रद्वये नासापुटद्वये च सप्तसु छिद्रेषु प्रक्षिप्य, सुवर्णखण्डं केवलं मुखे क्षिपेदिति वा। नख-केश-श्मश्रु-वपनं वस्त्रं परिधत्ते ब्राह्मणस्य सोपवीतम्। सक्चन्दनादिभिर्विभूषितम्। तच्छरीरमाज्येनाऽभ्युक्ष्येति कात्यायनः। तत्र पुत्रादिभिः वपनं स्नानं वस्त्रं परिधार्य पवित्रधारणम्। ततो मृतकस्थानादारभ्य अस्थिसञ्चयनान्तं षट् पिण्डान् दद्यात्। स्थाने[1] द्वारे[2] चतुष्पथे[3] चितायां[4] शवहस्तके[5]। अस्थिसञ्चयने

बदले, माला-चन्दन आदि से विभूषित शरीर को घी से स्नान करावे, ब्राह्मण के लिये ऐसा कात्यायन का वचन है। तब पुत्रादि बाल बनवावें, नहाय, कपड़ा पहन कर पवित्र धारण करें। तब दाहकर्ता मृतकस्थान से लेकर अस्थिचयन तक ६ पिण्ड दे। १ पिण्डस्थान पर, १ द्वार पर, १ चौराहे पर, १ विश्राम स्थान पर, १ शव के हाथ में, १ चिताभूमि पर दे। यह मलिन नामवाला ६ पिण्ड पहला षोडश में कहा जाता है। 'अद्य०' आदि पढ़कर मृतक स्थान पर ॥ १ ॥ 'अद्य०'

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

आदि पढ़कर द्वार पर ॥ २ ॥ 'अद्य०' आदि पढ़कर चौराहे पर ॥३॥ 'अद्य०' आदि पढ़कर विश्राम स्थान पर ॥४॥

प्रेत० ६ भा०

षष्ठो दश पिण्डा दशाह्निकाः ॥ १ ॥ मलिनं षोडशं चैतत् प्रथमं परिकीर्तितम् । तत्र क्रमः । (स्थाने)–अद्याऽमुकगोत्रपितरमुकप्रेत भूमितुष्टयर्थं मृतकस्थाने शवो नाम एष पिण्डस्ते मया दीयते तवोपतिष्ठताम् ॥ १ ॥ (ततो द्वारदेशे)–अद्यामुकगोत्रपितरमुकप्रेत दूततुष्टयर्थं गृह-वास्त्वधिदेवतातुष्टयर्थं च द्वारदेशे पान्थनाम एष पिण्डस्ते मया दीयते तवोपतिष्ठताम् ॥ २ ॥ (चतुष्पथे)–अद्याऽमुकगोत्रपितरमुकप्रेत भूतकोटिपलायनकामः चत्वरे खेचरनाम एष पिण्डस्ते मया दीयते तवोपतिष्ठताम् ॥ ३ ॥ (विश्रामस्थाने)–अद्याऽमुकगोत्रपितरमुकप्रेत विामकाले पिशाचादि-अविघ्नार्थकामः विश्रामे भूतनाम एष पिण्डस्ते मया दीयते तवोपतिष्ठताम् ॥ ४ ॥ (चितायाम्)–अद्याऽमुकगोत्रपितरमुकप्रेत मोक्षकामः चितायां दाहसाधनं नाम एष पिण्डस्ते मया दीयते तवोपतिष्ठताम् ॥ ५ ॥ (अस्थिसञ्चयनस्थाने)–अद्याऽमुकगोत्रपितरमुकप्रेत मोक्षकामः अस्थिसञ्चयननिमित्तक एष पिण्डस्ते मया दीयते तवोपतिष्ठताम् ॥ ६ ॥ ततो नारायणनाम-

'अद्य०' आदि को पढ़कर चिता पर ॥ ५ ॥ 'अद्य०' आदि वाक्य से अस्थिसंचयन स्थान पर ॥ ६ ॥ तब नारायण का

Kirtikant Sharma Collection, Najafgarh .

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

नाम लेकर मुर्दे को उठा कर गङ्गा आदि अथवा पवित्र पृथिवी भाग पर ले जाकर चन्दन आदि उत्तम यज्ञीय काष्ठों से चिता रच कर, उसके ऊपर पुरुष का नीचे को मुँह, उत्तर की ओर शिर रखे और स्त्री का उतान देह और उत्तर की

स्मरणपूर्वकं शवमुत्थाय गङ्गादिनदीषु पवित्रभूभागे वा गत्वा चन्दनोत्तमादियज्ञीयकाष्ठैश्चितां रचयित्वा तस्योपरि पुरुषमधोमुखं उदक्शिरसं च निधाय। नारीं तूत्तानदेहामुत्तरशिरस्कां च स्थापयेत्। गयादीनि च तीर्थानि ये च पुण्याः शिलोच्चयाः। कुरुक्षेत्रं च गङ्गां च यमुनां च सरिद्वराम्॥ कौशिकीं चन्द्रभागां च सर्वपापप्रणाशिनीम्। भद्रावकाशां सरयूं गण्डकीं तमसां तथा॥ वैष्णवं च वराहं च तीर्थं पिण्डारकं तथा। पृथिव्यां यानि तीर्थानि चतुरः सागरांस्तथा॥ एतानि तीर्थानि मनसा ध्यात्वा। पञ्चके मृतश्चेत् पञ्चकविधानम्। अद्याऽमुकगोत्रस्य पितरमुकप्रेतस्य धनिष्ठादि-पञ्चकमरण-सूचितवंशारिष्ट-विनाशार्थं पञ्चकमरणविधिं करिष्ये। दर्भमयान् पञ्च पुत्तलान् कृत्वा यवपिष्टैरनुलिप्य ऊर्णासूत्रेण वेष्टयित्वा प्रेतोपरि न्यसेत्। प्रथमं शिरसि

ओर शिर रखे। इसके बाद गया आदि तीर्थों का मानसिक ध्यान करे। यदि पञ्चक में मृत्यु हुई हो तो पञ्चक विधि करे। 'अद्य०' आदि पढ़कर संकल्प करे। दर्भमय पाँच पुतला बनाकर, जौ के आटे में अनुलेपन करे, ऊन के सूत में लपेट कर, मृतक पर रखे। एक पुतला शिर पर, दूसरा दाहिनी कोख पर, तीसरा बाईं कोख पर, चौथा नाभि पर, पाँचवाँ

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

पैरों के बीच में रखें। उसके बाद नाममन्त्रों—प्रेतवाहाय० ॥ १ ॥ प्रेतसखाय० ॥२॥ प्रेतपाय० ॥३॥ प्रेतभूमिपाय० ॥४॥ प्रेतहर्त्रे० ॥ ५ ॥ से घृत की आहूति दे। तब दक्षिण मुँह हो अग्नि लेकर, 'कृत्वा तु' इन मन्त्रों को पढ़कर, प्रदक्षिणा कर

द्वितीयं दक्षिणकुक्षौ। तृतीयं वामकुक्षौ। चतुर्थं नाभौ। पञ्चमं पादयोर्मध्ये न्यसेत्। तदुपरि नाममन्त्रैर्घृताहुतीर्दद्यात्। प्रेतवाहाय स्वाहा ॥ १ ॥ प्रेतसखाय स्वाहा ॥ २ ॥ प्रेतपाय स्वाहा ॥ ३ ॥ प्रेतभूमिपाय स्वाहा ॥ ४ ॥ प्रेतहर्त्रे स्वाहा ॥ ५ ॥ ततः दक्षिणाभिमुखो हुताशनं गृहीत्वा। कृत्वा तु दुष्करं कर्म जानता वाऽप्यजानता। मृत्युकालवशं प्राप्तं नरं पञ्चत्वमागतम् ॥ धर्माऽधर्मसमायुक्तं लोभमोहसमावृतम्। दहेयं सर्वगात्राणि दिव्याँल्लोकान् स गच्छतु ॥ इति मन्त्रमुदीर्य प्रदक्षिणं विधाय प्रज्वलदुल्मुकस्य शिरोदेशे दानम्। ततस्तृणकाष्ठादिषु घृतं परिक्षिप्य दग्ध्वा किञ्चिच्छेषयेत्। ततः प्रादेशमात्रं सप्तकाष्ठिकाभिः सह प्रदक्षिणासप्तकं विधाय ॥ कुठारेणोल्मुकोपरि प्रहारसप्तकं कृत्वा। क्रव्यादमग्निं प्रहिणोमि दूरं यमराज्यं स गच्छत्विति प्रवाहः। इहैवाऽयमितरो जातवेदा देवेभ्यो हव्यं च ददतु प्रजानयत्स्वाहा (तूष्णीं वा) एकैकां

जलती आग को शिर स्थान में लगावे। तब तृण, काष्ठ आदि पर घी देकर जलावे। जब कुछ शेष बच जाय तो दस अङ्गुल की सात लकड़ी लेकर, सात प्रदक्षिणा कर, कुठार से जलती लकड़ी पर सात बार प्रहार कर, 'क्रव्याद०' मन्त्र

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

पढ़कर (या चुपचाप) एक-एक लकड़ी को अग्नि में छोड़े । दो वर्ष कँ भीतर मरे हुए को गन्ध-माला आदि से अलंकृत कर 'अहरह' इस यमगाथा को गाते हुए बान्धव लोग गाँव से बाहर पबित्र भूमि में खनकर गाड़ दें । उसका उदकदान न करें । प्रेत के दाह के बाद सब मुर्दे को छूनेवाले और मुर्दे के संग जाने वाले चिता के वाम पार्श्व से घूमकर जलाशय

काष्ठिकामग्नौ क्षिपेत् । अनतीतद्विवर्षप्रेतं गन्धमाल्यादिभिरलंकृत्य । अहरहर्नयमानो गामश्वं पुरुषं पशून् । वैवस्वतो न तृप्यति सुराप इव दुर्मतिः ।। इति यमगाथां गायन्तो बान्धवा ग्रामाद् बहिः शुचिदेशे निखनेयुः । तत्र नोदकदानादि । तत्र प्रेतदाहाऽनन्तरं सर्वे शवस्पृशः शवानुगमनकर्तारश्च चितावामावर्तेन परावृत्य व्यावर्त्य जलाशये सर्वे गच्छेयुः । सकृन्निमज्जेयुः । अङ्गं च न विघर्षेयुः । ततो द्विवासस आचम्य जले वा पाषाणपृष्ठे वा शुचितीरदेशे वा दक्षिणाग्रकुशत्रयोपरि वामहस्तान्वारब्ध-दक्षिणहस्ताङ्गुष्ठ-तर्जनीमध्यमात्मक-पितृतीर्थेन द्विगुणभुग्नकुशत्रयेण प्रेतगोत्रनामनी उच्चार्य मृतं मनसा ध्यायन्तः प्रेताय सतिलजलाञ्जलिं दद्युः । ॐ अद्यामुकगोत्र-पितरमुकप्रेत एष तिलतोयाञ्जलिस्ते मया दीयते तवोपतिष्ठताम् । इयं च जलदानक्रिया दशपुरुष-

में जाँय । एक गोता लगावें । अङ्ग न मले । तब दो कपड़ों के सहित आचमन कर जल में, या पत्थर पर या पवित्र तीर पर दक्षिणाग्र कुशत्रय के ऊपर बाँया हाथ लगा हुआ दाहिने हाथ की अँगूठा-तर्जनी-मध्यमा अंगुली के साथ पितृतीर्थ से तीन कुशा दोहरा लेकर, प्रेत का गोत्र नाम 'ॐ अद्यामुक०' उच्चारण कर, मृत व्यक्ति का मानसिक ध्यान करते हुए प्रेत

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

के लिए तिल सहित जलाञ्जलि देवे। यह जलदानक्रिया दशपुरुष पर्यन्त करना चाहिए। दूसरे दिन से लेकर दश दिन पर्यन्त प्रातः जलदान करना और सायंकाल को पीपल के नजदीक 'सर्वतापो०' पढ़कर जल देना और 'अन्धकारं

पर्यन्तं कर्तव्या। द्वितीयदिनमारभ्य दशरात्रावच्छिन्न-प्रातःसायङ्काले पिप्पलसमीपे जलदीपदानम्। (तद्यथा)—सर्वतापोपशमनमध्व-श्रमविनाशनम्। प्रेततृप्तिकरं वारि पिब प्रेत! सुखी भव॥ अद्याऽमुगोत्राऽमुकप्रेत एष तद्गताध्व-तापश्रमनिवर्तका-ऽशौचान्तर्गत-प्रथमदिनेऽश्वत्थशाखावलम्बित-जलपूर्णघटः सतिलस्ते मया दीयते तवोपतिष्ठताम्। इति जलदानम्। अथ सायङ्काले दीप-दानम्। अन्धकारं महाघोरं रविर्यत्र न दृश्यते। तस्योपकरणार्थाय दीपोऽयं दीयते मया॥ ॐ अद्याऽशौचान्तर्गतप्रथमदिनेऽमुकगोत्रामुकप्रेत यममार्गानुसन्तरणघोरमिश्रान्धतमःसन्तरणकामः पिप्पलसमीपे एष दीपो मद्दत्तस्तवोपतिष्ठताम्। अथ बान्धवैः सह तडागे गत्वा नद्यादौ वा गत्वा दशरात्रमात्मशुद्धयर्थं प्रत्यहं स्नानं कुर्यात्। एवं प्रत्यहं दशरात्रावच्छिन्नं सायंप्रातः कुर्यात्। क्रियामुपविशेत्। अलवणमेकवारमेकभुक्तं स्वयं पाकं कुर्यात्।

महाघोरं०' पढ़कर दीपक बालना। ओर बान्धवों के साथ बावली, नदी आदि में जाकर दशरात्र आत्मशुद्धि के निमित्त प्रतिदिन स्नान करे। इस प्रकार प्रतिदिन बिना नागा दोनों समय करे। जो क्रिया करे बिना नमक, एक बार स्वयं भोजन बनाकर खाये।

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2
Kirtikant Sharma Collection, Najafgarh

अथ पिण्डदानक्रिया कहते हैं। अन्य गोत्र हो, या सगोत्र हो, स्त्री हो, या पुरुष पहले दिन जिस चीज का पिण्डदान करे उसी वस्तु का बराबर दश दिन तक करना। चाहे वह सालि (जड़हन का चावल) हो, या सत्तू हो, या साग हो। षोडश श्राद्ध करना पुत्र का कर्तव्य है। रोज बराबर न कर सके तो १ ले, ३ रे, ५वें ७वें, ९वें, १०वें दिन

अथ पिण्डदानक्रिया

अन्यगोत्रः सगोत्रो वा नारी वा यदि वा पुमान्। प्रथमेऽहनि यो दद्यात् स दशाहं समापयेत्। शालिना सक्तुभिर्वाऽपि शाकैर्वाऽपि च निर्वपेत्। प्रथमेऽहनि यद्द्रव्यं तदेव स्याद्दशाह्निकम्॥ षोडश-श्राद्धानि तु पुत्रेणैव कर्तव्यानि, इति सिद्धम्। प्रथमे च तृतीये वा पञ्चमे सप्तमे तथा। नवमे दशमे चैव पिण्डदानं प्रकीर्तितम्॥ वृद्धगार्ग्यः—पतिः पत्नीसमायुक्तो दह्यत्येकहुताशने। पाकमेकं प्रकुर्वीत पिण्डं दद्यात् पृथक् पृथक्॥ यदि पुत्राद्यधिकारिणि विदेशस्थेऽन्येन दाहकर्त्रा पिण्डदाने कृतेऽपि पुत्रादिरपि पिण्डं दद्यात्। (अथाऽस्थिसञ्चयनम्।) चतुर्थे ब्राह्मणानां तु

पिण्डदान करे। वृद्ध गार्ग्य का वचन है कि—पति और पत्नी एक चिता पर दग्ध किये गये हों तो पाक एक बनाना और पिण्ड अलग-अलग देना। यदि पुत्र आदि अधिकारी परदेश हों और दूसरा दाहकर्ता हो तो पिण्डदान करने पर भी पुत्र आदि पिण्डदान करें।

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2
Kirtikant Sharma Collection, Najafgarh

अथ अस्थिसञ्चयनम्। चौथे दिन ब्राह्मण, पाँचवें दिन क्षत्रिय, नवें दिन वैश्य, दशवें दिन शूद्र देश-काल के अनुसार श्राद्ध करे। यहाँ श्राद्ध में अस्थिसञ्चय और एकोद्दिष्ट विधान ग्रहण करना। इस प्रकार अशौच के अंगस्पर्श के सम्बन्ध में भी ४ थे दिन ब्राह्मण का, छठे दिन क्षत्रिय का, ८वें दिन वैश्य का, १०वें दिन शूद्र का स्पर्श है। पहले दिन, तीसरे

पञ्चमेऽहनि भूभुजाम्। नवमे वैश्यजातीनां शूद्राणां दशमात् परे। कर्तव्यं तु नरैः श्राद्धं देश-कालविरोधतः॥ श्राद्धमत्राऽस्थिसञ्चयम् एकोद्दिष्टविधानकम्। एतच्च सम्पूर्णाऽशौचेषु दिनकथनम्। एवमाशौचिनामङ्गस्पर्शेऽपि। चतुर्थेऽहनि विप्रस्य षष्ठे वै क्षत्रियस्य तु। अष्टमे दशमे चैव स्पर्शः स्याद् वैश्य-शूद्रयोः॥ यत्तु—प्रथमेऽह्नि तृतीये वा सप्तमे नवमेऽपि वा। अस्थिसञ्चयनं कार्य्यं निजैस्तद्-गोत्रजैः सह॥ इति स्मृतिवाक्यम्। तद्ब्राह्मणादीनां चतुर्थादिदिनेष्वस्थिसञ्चयासम्भावनायां प्रथमादि-दिवसेष्वस्थिसञ्चयनविधायकम्। त्र्यहाशौचे तु—द्वितीयेऽह्नि। सद्यः शौचे तद्दिन एवाऽस्थि-सञ्चयः कर्तव्यः। असम्पूर्णाशौचान्तरेषु तृतीयभागोत्तरमस्थिसञ्चयोऽङ्गस्पर्शश्च कर्तव्य इति।

दिन, सातवें दिन, नवें दिन भी निज गोत्रज के साथ अस्थिसंचय करना, ऐसा स्मृति का वचन है। ब्राह्मण आदि को चौथे दिन अस्थिसंचय की सम्भावना हो तो प्रथम दिन करे। तीन दिन के अशौच में दूसरे दिन, एक रोज के अशौच में उसी रोज अस्थिसंचय करे। असम्पूर्ण अशौच के तीसरे भाग में अस्थिसंचय अंगस्पर्श करना।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

अथ अस्थिसञ्चोयनप्रयगः। चौथे दिन स्नान कर ४ पिण्ड देकर श्राद्धस्थान को गोबर से या पंचगव्य से लिपवा कर, जलते अंगारे को घुमावे और गौरमृत्तिका से आच्छादन कर, सफेद सरसों और तिल बिखेरना। स्वयं पाक करे।

अथाऽस्थिसञ्चयनप्रयोगः

चतुर्थदिने स्नात्वा चतुर्थपिण्डं दत्वा श्राद्धदेशस्य गोमयोपलेपनं पञ्चगव्योपलेपनं च ज्वलदङ्गारभ्रमणं गौरमृत्तिकाऽऽच्छादनानि कारयित्वा। गौरसर्षपैस्तिलैश्च विकरणम्। स्वयं पाकमारभेत्। ततः सिद्धान्ने रक्षादीपं निधाय। नमो नमस्ते गोविन्द! पुराणपुरुषोत्तम!। इदं श्राद्धं हृषीकेश! रक्ष त्वं सर्वतो दिशः॥ ॐ प्राच्यै नमः। ॐ अवाच्यै नमः। ॐ प्रतीच्यै नमः। ॐ उदीच्यै नमः। ॐ अन्तरिक्षाय नमः। ॐ भूम्यै नमः। इति दिग्-रक्षणं कुर्यात्। श्राद्धदेयानि वस्तून्यासाद्य। पूर्वाभिमुख उपविश्याऽऽचम्य। 'ॐ अपवित्रः पवित्रो वे'ति आत्मानं श्राद्धसामग्रीं च सम्प्रोक्ष्य। ततः त्रिकुश-तिल-जलान्यादाय। ॐ अद्यामुकगोत्रस्य पितुरमुकप्रेतस्याऽस्थिसञ्चयननिमित्तकमेकोद्दिष्टश्राद्धमहं करिष्ये। ततस्त्रिर्गायत्रीं जपित्वा। ॐ देवताभ्यः

तब सिद्धान्न होने पर रक्षादीप रखकर, 'नमो नमस्ते०' आदि मंत्र पढ़कर दिशाओं की रक्षा करे। श्राद्ध में देने योग्य वस्तु के पास जाकर, पूर्वमुख बैठ कर, आचमन करे, अपने ऊपर और श्राद्धसामग्री पर जल छिड़क कर तीन कुशा, तिल और जल ले

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

कर 'अद्य०' पढ़े। तब तीन बार गायत्री जप कर 'ॐ देवताभ्यः' तीन बार पढ़े। तब अपसव्य हो मोटक, तिल, जल लेकर दक्षिण की ओर मुँह कर, सव्यजानु से 'अद्याऽमुक०' पढ़कर आसन पर, तिल बिखेर कर 'ॐ आयन्तु०' ऐसा मंत्र पढ़े।

पितृभ्यश्च महायोगिभ्य एव च। नमः स्वाहायै स्वधायै नित्यमेव नमो नमः॥ इति त्रिः पठेत्। ततोऽपसव्यम्। मोटक-तिल-जलान्यादाय दक्षिणाभिमुखः सव्यं जान्वाच्य। अद्यामुकगोत्रपितरमुकप्रेताऽस्थिसञ्चयननिमित्तकैकोद्दिष्टश्राद्धे इदमासनं ते मया दीयते तवोपतिष्ठताम्॥ ॐ अपहता ऽअसुरा रक्षाँ सि वेदिषदः, इति श्राद्धदेशे तिलान् विकीर्य। ॐ आयन्तु नः पितरः सोम्यासोऽग्निष्वाताः पथिभिर्देवयानैः। अस्मिन्यज्ञे स्वधया मदन्तोऽधि ब्रुवन्तु तेऽवन्त्वस्मान्॥ इति मन्त्रं पठेत्। ततः पुटके कुशपत्रद्वयं प्रादेशमात्रं दक्षिणाग्रं धृत्वा। ॐ शन्नो देवीरभिष्टय ऽआपो भवन्तु पीतये। शंय्योरभिस्रवन्तु नः॥ इति पुटके जलं क्षिपेत्॥ ॐ तिलोऽसि सोमदैवत्यो गोसवो देवनिर्मितः। प्रत्नमद्भिः प्रक्तः स्वधया पितॄँल्लोकान्प्रीणाहि नः स्वाहा। इति तिलान् क्षिपेत्। गन्ध-पुष्पे तूष्णीं क्षिपेत्। तदर्घपात्रं वामहस्ते कृत्वा पवित्रे भोजनपात्रे उत्तराग्रं धृत्वा। तदुपरि

तब पुटक में दो कुशपत्र प्रादेशमात्र धरकर 'ॐ शन्नो०' ऐसा कह कर पुटक में जल छोड़े। 'ॐ तिलोऽसि०' पढ़ कर तिलों को छोड़े। गंध और पुष्प को चुपचाप छोड़े। तब अर्घपात्र बायें हाथ में लेकर पवित्र भोजनपात्र पर उत्तराग्र धरकर

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

उसके ऊपर कुछ जल देकर 'ॐ या दिव्या०' यह मन्त्र पढ़कर मोटक आदि लेकर 'अद्य०' यह संकल्प पढ़कर पवित्र पर कुछ जल गिरावे। तब पवित्र आदि के सहित अर्घपात्र को अधोमुख करके 'प्रेतस्थानमसि' ऐसा कहकर आसन के बायें

किञ्चिदुदकान्तरं दत्वा। ॐ या दिव्या ऽआपः पयसा संबभूवुर्याऽअन्तरिक्षाऽउतपार्थिवीर्याः। हिरण्यवर्णा यज्ञियास्ता न ऽआपः शिवाः शर्ठ स्योना सुहवा भवन्तु॥ इति पठित्वा, मोटकादीन्यादाय। ॐ अद्याऽमुकगोत्रपितरमुकप्रेताऽस्थिसञ्चयन-निमित्तकैकोद्दिष्टश्राद्धे एष हस्तार्घस्ते मया दीयते तवोपतिष्ठताम्। इति पवित्रोपरि जलमुत्सृजेत्। ततः पवित्रादिसहितमर्घपात्रमासनवामपार्श्वे प्रेतस्थानमसि, इत्यधोमुखं स्थापयेत्। ततः चटोपरि गन्धादि दत्वा मोटक-तिल-जलान्यादाय। अद्याऽमुकगोत्रपितरमुकप्रेताऽस्थिसञ्चयनमित्तकैकोद्दिष्टश्राद्धे एतानि गन्ध-पुष्प-धूप-दीप-ताम्बूल-यज्ञोपवीत-वासांसि ते मया दीयते तवोपतिष्ठताम्। ततो जलेन भोजनपात्रा-ऽऽसनयोश्चतुर्दिशं मण्डलं कृत्वा। यथा चक्रायुधो विष्णुस्त्रैलोक्यं परिरक्षति। एवं मण्डलतोयं तु सर्वभूतानि रक्षतु॥ ततो घृत-तिल-जलयुतमन्नमादाय। ॐ इदमन्नमेतद्भूस्वामिपितृभ्यो नमः।

बगल में रख दे। तदनन्तर चट के ऊपर चन्दन, पुष्प, धूप आदि चढ़ाकर हाथ में तिल, जल आदि लेकर 'अद्याऽमुकगोत्र०' यह संकल्पवाक्य पढ़े। तब 'यथाचक्रायुधो०' आदि मंत्र पढ़ता हुआ जल से भोजनपात्र और आसन के सहित चारों ओर

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

मण्डल करे। फिर घृत, तिल और जल युक्त अन्न लेकर, 'ॐ इदमन्नमेतद्भूस्वामि०' इस मंत्र से दक्षिण की ओर कुशा पर रख दे। इसके बाद अन्न से भरा हुआ ताम्रपात्र दोनों हाथों से उठावे और क्षणभर रुककर पितरों का ध्यान करता हुआ एक मनुष्य के खाने भर अन्न भोजनपात्र में परोसे। फिर दो दोना में घृत तथा जल लेकर रखे, दोनों हाथों से अन्न

इति कुशोपरि दक्षिणत उत्सृजेत्। ततो हस्ताभ्यां ताम्रपात्रमन्नपूर्णमादाय मनाक्स्थित्वा पितरं ध्यायन् पुरुषतृप्तिक्षममन्नं परिविष्यात्। पुटकद्वये घृतं जलं चोपनीय अन्नोपरि हस्तद्वयेन मधु दत्वा। ॐ मधु व्वाता ऽऋतायते मधु क्षरन्ति सिन्धवः। माध्वीर्नः सन्त्वोषधीः। मधु नक्त-मुतोषसो मधुमत्पार्थिवꣳ रजः। मधु द्यौरस्तु नः पिता। मधुमान्नो वनस्पतिर्मधुमाँ ऽअस्तु सूर्यः। माध्वीर्गावो भवन्तु नः। ॐ मधु मधु मध्विति च जपेत्। ततो व्यस्ताभ्यां हस्ताभ्यां पात्रमा-लभ्य। ॐ पृथिवी ते पात्रं द्यौरपिधानं ब्राह्मणस्य मुखेऽमृतेऽमृतं जुहोमि स्वाहा। ॐ इदं विष्णुर्विचक्रमे त्रेधा निदधे पदम्। समूढमस्य पाꣳसुरे स्वाहा॥ ॐ कृष्णकव्यमिदं रक्ष मदी-यम्। इति पठित्वा। ॐ इदमन्नम्। ॐ इमा आपः। ॐ इदमाज्यम्। ॐ इदं कवि-

पर मधु डाले। साथ-साथ 'मधु व्वाता०' आदि मन्त्र पढ़ता रहे। मंत्रपाठ के अनन्तर तीन बार 'मधु मधु मधु' का जप करे। तब उल्टे हाथों से भोजनपात्र का स्पर्श करता हुआ 'ॐ पृथिवी ते पात्रं०' आदि मन्त्र पढ़े। तब 'इदमन्नं०' कहकर अन्न में 'इमा आपः' जल की तरफ, 'इदमाज्यं' घी की तरफ, 'ॐ इदं कविः' कह कर फिर अन्न की ओर दाहिने अँगूठा से संकेत

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

करे। 'ॐ अपहताऽअसुरा०' यह मंत्र पढ़े। तिल भोजनपात्र पर छिड़के, बायें हाथ से भोजनपात्र का स्पर्श किये हुए ही दाहिने हाथ में मोटक, तिल, जल आदि लेकर 'ॐ अद्यामुकगोत्र०' यह संकल्प वाक्य पढ़कर मोटक आदि पृथ्वी पर रख दे। सव्य हो तीन बार गायत्रीमन्त्र 'ॐ मधु व्वाता०' इस ऋचा को पढ़े, और 'मधु मधु मधु' का भी जप करे। साथ

रिति पुनरन्ने। इति दक्षिणाङ्गुष्ठं निवेश्य। ॐ अपहता ऽअसुरा रक्षाँ ऽसि वेदिषदः। इत्यन्नोपरि तिलान् विकीर्य। वामहस्तेन पात्रमत्यजन् दक्षिणहस्तेन मोटकादीन्यादाय। अद्याऽमुकगोत्रपितरमुकप्रेताऽस्थिसञ्चयननिमित्तकैकोद्दिष्टश्राद्धे इदमन्नं सोपकरणं ते मया दीयते तवोपतिष्ठताम्। इत्युत्सृजेत्। ततो गायत्रीं त्रिर्जपेत्। ॐ मधु व्वातेति तृचं मधु मधु मध्विति च जपेत्। अन्नहीनं क्रियाहीनं विधिहीनं च यद्भवेत्। तत्सर्वमच्छिद्रमस्तु। इति च जपेत्। ततः कुशेषूपविश्य गायत्रीं त्रिर्जपेत्। मधु व्वातेति त्र्यृचं मधु मधु मध्विति च जपेत्। ततो रक्षोघ्नीसूक्तं जपेत्। ॐ कृणुष्व पाजः प्रसितिन्न पृथ्वीं याहि राजेवामवाँ२ ऽइभेन।

ही 'अन्नहीनं क्रियाहीनं०' इस मन्त्र को भी जपे। तदनन्तर कुशाओं पर बैठकर फिर तीन बार गायत्री का जप करे। 'मधु व्वाता०' यह ऋचा और 'मधु मधु मधु' इसको भी जपे। तब 'ॐ कृणुष्वपाजः०' आदि पाँच रक्षोघ्नीसूक्तों का पाठ करे। पुनः 'उदीरितामवर०' इस मन्त्र को, 'सहस्रशीर्षा०' आदि पुरुषसूक्त के १६ मन्त्र, 'आशुः शिशान०' आदि १२ मन्त्र,

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

इसके अतिरिक्त और भी बहुत से पवित्र मन्त्रों का अपनी शक्ति अनुसार पाठ करे। इसी क्रम से 'नमस्तुभ्यं विरूपाक्ष०' इस श्लोक का भी पाठकरे। तदनन्तर भोजनपात्र के पास की कुशाओं से ढकी भूमि को जल से सींचे और तिल, घृतयुक्त

तृष्वीमनु प्रसितिन्द्रूणानो स्तानि ऽविद्धच रक्षस्तपिष्टैः ॥ १ ॥ तव कामास ऽआशुया पतन्त्य-नुस्पृश धृषता शोशुचानः। तपूंष्यग्ने जुह्वा पतङ्गा न सन्दितो विसृज विष्वगुल्काः ॥ २ ॥ प्रति स्पशो विसृज तूर्णितमो भवा पायुर्विशो अस्या अदब्धः। यो नो दूरेऽअघशꣳसो यो ऽअन्त्यग्ने मा किष्टे व्यथिरादधर्षीत् ॥ ३ ॥ उदग्ने तिष्ठ प्रत्या तनुष्व न्यमित्राँ२ ॥ ऽओषता-त्तिग्महेते। यो नो ऽअरातिꣳ समिधान चक्रे नीचा तन्धक्ष्यतसन्न शुष्कम् ॥ ४ ॥ ऊर्ध्वो भव प्रतिविद्धचास्मदाविष्कृणुष्व दैव्यान्यग्ने अव स्थिरा तनुहि यातु जूना जामिमजामिम्प्रमृणीहि शत्रून् ॥ इति रक्षोघ्नीसूक्तम्। ॐ उदीरतामवर ऽउत्परास उन्मध्यमाः पितरः सोम्यासः असुं ऽय ईयुरवृका ऽऋतज्ञास्ते नोऽवन्तु पितरो हवेषु ॥ इति पितृमन्त्रम्। पुरुषसूक्तम्–सहस्रशीर्षा १६ मन्त्रा। अतिरथम्। आशुः शिशान १२ मन्त्रान्। अन्यानि पवित्राणि यथाशक्ति च जपेत्। नमस्तुभ्यं विरूपाक्ष ! नमस्तेऽनेकचक्षुषे !। नमः पिनाकहस्ताय वज्रहस्ताय वै नमः ॥ इति श्लोकं च पठेत्। तत उच्छिष्टसन्निधावास्तृतकुशत्रयीं भूमिं जलेन प्रोक्ष्य, तिल-घृत-सहितमन्नं

अन्न को जल से गीला करके 'ॐ अग्निदग्धाश्च ये जीवा०' यह मन्त्र पढ़ता हुआकुशा पर अन्न रखे। अपसव्य होजाय।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

आचमन, प्राणायाम करके भगवान् का स्मरण करे। यह करके फिर अपसव्य हो जाय। तब भोजनपात्र के समीप पिण्ड दान के निमित्त मिट्टी की वेदी के मध्य में एक बालिश्त नाप कर बायें हाथ से सटे हुए दाहिने हाथ से 'ॐ अपहता ऽअसुरा०' यह मन्त्र पढ़ता हुआ कुश के मूल भाग से एक रेखा खींचे। उस कुश की पिंजुली को उत्तर दिशा में फेंक दे। तब 'ये

जलेनाऽऽप्लाव्य। ॐ अग्निदग्धाश्च ये जीवा येऽप्यदग्धाः कुले मम। भूमौ दत्तेन तृप्यन्तु तृप्ता यान्तु परां गतिम्॥ इति कुशोपरि अन्नं विकिरेत्। ततः सव्यम्। आचम्य, प्राणानायम्य, हरिं स्मृत्वा। अपसव्यम्॥ भोजनपात्रसमीपे पिण्डदानार्थं मृद्वेदिकाया मध्ये प्रादेशमात्रं परिमाय वामान्वारब्ध-दक्षिणहस्तेन। ॐ अपहता ऽअसुरा रक्षाँसि वेदिषद÷॥ इति कुशमूलेन रेखा-करणम्। दर्भपिञ्जुलीमुत्तरस्यां दिशि क्षिपेत्। रेखोपरि अङ्गारं भ्रामयित्वा। ॐ ये रूपाणि प्रतिमुञ्चमाना ऽसुराः सन्त÷ स्वधया चरन्ति। परापुरो निपुरो ये भरन्त्यग्निष्टाँल्लोकान्प्रणुदात्य-स्मात्॥ इत्यङ्गारं दक्षिणतस्त्यजेत्। ततो रेखोपरि छिन्नमूलान् कुशानास्तीर्य सव्यम्। 'ॐ

रूपाणि प्रतिमुञ्च-' इस मन्त्र को पढ़ता हुआ उन रेखाओं पर आग का अङ्गारा घुमाकर दक्षिण की ओर रख दे। तब जिनकी जड़ काट डाली गयी है, ऐसी कुशाओं को रेखा के ऊपर बिछा कर सव्य हो जाय, 'ॐ देवताभ्यः पितृभ्यश्च०' इस मन्त्र को तीन बार जपे। फिर अपसव्य हो जाय। एक दोने में तिल, जल, चन्दन तथा पुष्प डालकर उसे बायें हाथ में

Kirtikant Sharma Collection, Najafgarh
CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

रखे और दाहिने हाथ में मोटक आदि लेकर 'ॐ अद्यामुकगोत्र०' आदि पढ़ता हुआ कुशा पर थोड़ा सा अवनेजन जल डाले और थोड़ाजल आगे रख दे। तब घृत, मधु, तिल युक्त अन्न से पिण्ड बनावे। उसमें मधु और घृत लगाकर मोटक आदि लेकर 'अद्यामुकगोत्र०' आदि संकल्प वाक्य पढ़कर, बायें हाथ से छुए हुए दाहिने हाथ से पिण्ड दे। तब वेदी पर बिछे

देवताभ्यः०' इति त्रिर्जपेत्। ततोऽपसव्यम्। पुटके तिल-गन्ध-पुष्पाणि क्षिप्त्वा, पुटकं वामहस्ते कृत्वा, दक्षिणहस्ते मोटकादीन्यादाय। ॐ अद्यामुकगोत्र पितरमुकप्रेताऽस्थिसञ्चयननिमित्तकैकोद्दिष्ट-श्राद्धपिण्डस्थानेऽत्रावने निक्ष्व ते मया दीयते तवोपतिष्ठताम्। इति कुशोपरि अवनेजनजलं किञ्चिद् दद्यात्। किञ्चिदग्रे धारयेत्। ततो घृत-मधु-तिलयुक्तेनाऽन्नेन पिण्डं निर्माय मधुघृताभ्याम-भिघार्य मोटकादीन्यादाय। अद्याऽमुकगोत्र पितरमुकप्रेताऽस्थिसञ्चयननिमित्तकैकोद्दिष्टश्राद्धे एष पिण्डस्ते मया दीयते तवोपतिष्ठताम्। इति कुशोपरि वामान्वारब्धदक्षिणहस्तेन पिण्डं दद्यात्। तत आस्तृतदर्भमूले करं प्रोक्ष्य। सव्यं कृत्वा, आचम्य। अपसव्यम्। ॐ अत्र पितरो मादयस्व यथाभागमावृषायस्व। उत्तराभिमुखीभूय, श्वासं नियम्य, पितरं भास्वरमूर्तिं ध्यायन्। अमी

कुशों में हाथ पोंछ कर सव्य हो जाय। आचमन करके फिर अपसव्य हो जाय। 'ॐ अत्र पितरो मादयस्व०' यह मंत्र पढ़ता हुआ उत्तर दिशा में मुख करके और श्वाँस रोक कर देदीप्यमान मूर्तिधारी पितर का ध्यान करता हुआ 'अमी

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

मदन्त पिता०' यह मन्त्र पढ़े। तब पूर्व में बचे अवनेजनपात्र तथा मोटक आदि को लेकर 'ॐ अद्यामुकगोत्र०' आदि वाक्य कहे। इसके बाद नीवी ढीली करके सव्य हो आचमन तथा हरिस्मरण करे। फिर अपसव्य होकर बायें हाथ से सूत्र उठा कर दाहिने हाथ में ले और 'एतत्ते पितर०' यह मन्त्र पढ़कर दोनों हाथों से पिण्ड के ऊपर सूत्र चढ़ावे। तब मोटक आदि

मदन्त पिता यथाभागमावृषायिषत ॥ ततः पूर्वदत्तावशिष्टाऽवनेजनपात्रमादाय मोटकादीनि चादाय। ॐ अद्याऽमुकगोत्र पितरमुकप्रेताऽस्थिसञ्चयननिमित्तकैकोद्दिष्टश्राद्धपिण्डेऽत्र प्रत्यवने निक्ष्व ते मया दीयते तवोपतिष्ठताम्। ततो नीवीं विस्रंस्य। ततः सव्यमाचम्य हरिं स्मृत्वा। अपसव्यं कृत्वा। वामहस्तेन सूत्रमादाय दक्षिणहस्ते धृत्वा, उभाभ्यां हस्ताभ्यां 'ॐ एतत्ते पितर्वासः' इति पिण्डोपरि सूत्रं दद्यात्। मोटकादीन्यादाय। ॐ अद्यामुकगोत्र पितरमुकप्रेताऽस्थिसञ्चयननिमित्तकैकोद्दिष्टश्राद्धपिण्डे एतद्वासस्ते मया दीयते तवोपतिष्ठताम्। ततः पिण्डे गन्ध-पुष्प-धूप-दीप-ताम्बूलानि दत्वा, पिण्डशेषाऽन्नं पिण्डसमीपे विकिरेत्। ॐ शिवा आपः सन्तु। ॐ सौमनस्यमस्तु। ॐ अक्षतं चाऽरिष्टमस्तु। इत्यन्नपात्रे दत्वा मोटकादीन्यादाय। अद्या-

हाथ में लेकर 'अद्यामुकगोत्र०' यह संकल्प वाक्य पढ़े। इसके अनन्तर पिण्ड पर गन्ध, पुष्प, धूप, दीप और ताम्बूल आदि चढ़ाकर बाकी बचे अन्न को पिण्ड के समीप में रखे। 'ॐ शिवा आपः सन्तु' 'ॐ सौमनस्यमस्तु' 'ॐ अक्षतं चारिष्टमस्तु' इन मंत्रों का उच्चारण करके भोजनपात्र पर रख दे, मोटक आदि लेकर 'अद्यामुक०' यह वाक्य पढ़ कर मोटक आदि

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

जमीन पर रख दे। तब सव्य होकर दक्षिण दिशा की ओर देखता हुआ 'ॐ अघोरः पिताऽस्तु' कह कर पिण्ड पर ऐसी जलधारा दे कि जिसका अग्र भाग पूर्व की तरफ रहे। तदनन्तर पूर्वाभिमुख हो हाथ जोड़कर प्रार्थना करता हुआ 'गोत्रन्नो

ऽमुकगोत्रस्य पितुरमुकप्रेतस्याऽस्थिसञ्चयननिमित्तकैकोद्दिष्टश्राद्धे दत्तैतदन्नपानादिकमुपतिष्ठताम्। इत्युत्सृजेत्। सव्यं कृत्वा दक्षिणां दिशं पश्यन्। ॐ अघोरः पिताऽस्तु। इति पिण्डोपरि पूर्वाग्रां जलधारां दद्यात्। ततः पूर्वाभिमुखः, ॐ गोत्रन्नो वर्द्धतां दातारो नोऽभिवर्द्धन्तां वेदाः सन्ततिरेव च। श्रद्धा च नो मा व्यगमद् बहुदेयं च नोऽस्तु। अन्नं च नो बहु भवेदतिथींश्च लभेमहि। याचितारश्च नः सन्तु मा च याचिष्म कञ्चन॥ एताः सत्याः आशिषः सन्तु। ततोऽपसव्यम्। पिण्डोपरि सपवित्रकुशान् दक्षिणाग्रमास्तीर्य्य। ॐ ऊर्ज्जं वहन्तीरमृतं घृतम्पयः कीलालम्परिस्रुतम्। स्वधास्थ तर्प्पयत मे पितरम्॥ इति कुशोपरि दक्षिणाग्रां जलधारां दद्यात्। ततः पिण्डमाघ्रायोत्थापयेत्। पिण्डाधारकुशानुल्मुल्कं च वह्नौ क्षिपेत्। अर्घपात्रमुत्तानीकृत्य मोटका-

वर्द्धतां सन्तु०' यह वाक्य कहे। तब पवित्री समेत कुशाओं को दक्षिणाग्र करके पिण्ड पर रखकर 'ऊर्जं वहन्ती०' यह मन्त्र पढ़ता हुआ दक्षिण को अग्रभाग करके जलधारा दे। तब पिण्ड को सूँघ कर उठावे। उन कुशाओं को जिन पर पिण्ड रखा था और अंगारा जो कि रेखा पर घुमाकर दक्षिण में रखा है दोनों को अग्नि में डाल दे। उलट कर रखे हुए अर्घ-

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

पात्र को सीधा कर दे और मोटक, तिल, जल आदि लेकर 'अद्यामुकगोत्रस्य०' आदि संकल्प वाक्य पढ़ कर ब्राह्मण को दक्षिणा दे। फिर सव्य हो जाय और 'ॐ देवताभ्यः०' इस मन्त्र को तीन बार पढ़े। फिर अपसव्य हो रक्षादीप को बुझाकर

दीन्यादाय । अद्यामुकगोत्रस्य पितुरमुकप्रेतस्य कृतैतदस्थिसञ्चयननिमित्तकैकोद्दिष्टश्राद्धप्रतिष्ठार्थमिदं दक्षिणाद्रव्यं यथानामगोत्राय ब्राह्मणाय दक्षिणां दातुमहमुत्सृजे। इति दक्षिणां दद्यात्। ततः सव्यं कृत्वा। 'ॐ देवताभ्यः०' इति त्रिर्जपेत्। अपसव्यम्। रक्षादीपं निर्वाप्य, हस्तौ पादौ प्रक्षाल्य। सव्यमाचम्य। प्रमादात् कुर्वतां कर्म प्रच्यवेताऽध्वरेषु यत्। स्मरणादेव तद्विष्णोः सम्पूर्णं स्यादिति श्रुतिः॥ श्राद्धीयवस्तूनि ब्राह्मणाय प्रतिपादयेत्। अम्भसि वा क्षिपेत्। ततः पुत्रादि-ज्ञातिबन्धुमिलितस्नातः सुधौतवाससी परिधाय। ततो नानाविधफलमूलादिभिः स्वजात्यनुरूपैरष्टौ पात्राणि पूरयित्वा। गन्ध-पुष्प-धूप-दीपादि गृहीत्वा। श्मशानसमीपमागत्य कैश्चित्पुष्पैः कैश्चिद्भोजनैः कैश्चिद्धूपैः कैश्चिद्दीपैः कैश्चित्पानीयैः कैश्चिदक्षतैः सर्वाणि निवेदयेत्। कैश्चिन्निरहङ्कार-

हाथ पाँव धो डाले। फिर सव्य होकर आचमन करे। और 'प्रमादात् कुर्वतां' यह वाक्य पढ़ता हुआ श्राद्ध की सभी वस्तुएँ ब्राह्मण को दे दें, या जल में फेक दें। तदनन्तर पुत्र आदि भाई-बन्धुओं के साथ स्नान करके धुले हुए वस्त्र पहने। तब अपनी जाति के अनुसार विविध प्रकार फल मूल आदि से आठ पात्रों को भर कर गन्ध, पुष्प, धूप, दीप, आदि

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

सामग्री लेकर श्मशान भूमि पर जाय। वहाँ कुछ लोग पुष्प, कुछ भोजन, कुछ धूप, कुछ दीप, कुछ माल्य, कुछ पानी और कुछ अक्षत यह सब उस भूमि को निवेदन करें। इसके बाद कुछ लोग निरहंकार भाव से चारों दिशाओं में जल आदि के चार पात्र निवेदन करें और प्रथम चिता के उत्तर द्वार के समीप बैठकर 'ॐ नमः क्रव्यादमुख्येभ्यो०' आदि वाक्य पढ़े।

युक्तैः समन्ततश्चतुर्दिक्षु चतुर्षु अन्नादिपात्रेषु निवेदितेषु। प्रथमं चितायाम् उत्तरद्वारसमीपे उपविश्य, ॐ नमः क्रव्यादमुख्येभ्यो देवेभ्य इति सर्वदा। येऽस्मिन् स्मशाने देवाः स्युर्भगवन्तः सनातनाः॥ तेऽस्मत्सकाशाद् गृह्णन्तु बलिमष्टाङ्गमक्षयम्। प्रेतस्याऽस्य शुभाँल्लोकान् प्रयच्छन्तु च शाश्वतान्। अस्माकमायुरारोग्यं सुखं च ददतां वरम्॥ इति पठित्वा। ॐ एषोऽष्टाङ्गबलिः शङ्करादिदेवताभ्यो नमः, इत्येकं बलिं दत्वा, एवम् अपरद्वारेषु बलिं दद्यात्। तान् बलीन् क्षीरेणऽभ्युक्ष्य शङ्करादि-देवताः स्वीय-स्वीयस्थानं गच्छन्तु, इति देवताः विसृज्य। अवशिष्टक्षीरेण वाग्यतः चितास्थानान्यस्थीनि अभ्युक्ष्य प्रथमं शिरोऽस्थीनि शमीपलाशशाखाभ्यामुद्धृत्याऽऽज्येना-

तब 'ॐ एषोऽष्टांगबलिः०' यह मन्त्र पढ़कर एक बलि दे। इसी तरह और द्वारों पर भी बलि देनी चाहिए। तदनन्तर उन बलियों को दूध से स्नान कराकर 'शंकरादिदेवताः' यह वाक्य कह कर देवताओं का विसर्जन करे। बलि स्नान कराने पर भी जो दूध बचा हो उसे चिता की हड्डियों पर डाल दे। फिर शमी और पलाश की दो लकड़ियों से पहले मस्तक

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

करके सुगन्धित जल से सींचे। फिर अपसव्य होकर दाहिने हाथ के अँगूठे तथा कनिष्ठिका उँगली से उठावे। तब और-और अङ्गों की हड्डी बटोर कर उन्हें पंचगव्य तथा सुगन्धित जल से सींचे, तब उन हड्डियों को पलाश के दोने में रखे और रेशमी कपड़े से लपेट कर मिट्टी के नये बर्तन में रखकर बर्तन को ढाँक देवे। फिर उस बर्तन को जङ्गल में किसी वृक्ष की जड़ में अथवा

ऽभ्युदय गन्धवारिणा च सिक्त्वा कृताऽपसव्यो दक्षिणाङ्गुष्ठकनिष्ठाभ्यां गृहीत्वा ततोऽन्यानि अस्थीनि गृहीत्वा पञ्चगव्येन सुगन्धवारिणा च सिक्ता। पलाशपुटके निक्षिप्य क्षौमवस्त्रेण संवेष्ट्य मृण्मये नूतनभाण्डे साच्छादने निदध्यात्। तद्भाण्डमरण्ये वृक्षमूले वा पङ्क-शैवालयुतगर्ते वा निभृत निर्वासयेत्। चिताभस्मादितोये विनिःक्षिपेत्। गोमयाऽम्बुभिश्चितामूमिशुद्धिं विधाय पूर्ववच्चतुर्दिक्षु शङ्करादिदेवताभ्यो बलिं दद्यात्। तान् विसृज्य बल्यन्नमम्भसि क्षिपेत्। ततश्चितामूमेराच्छादनार्थं वृत्तः पुष्करकः पट्टको वा कारयितव्यः। (पुष्करकः = इष्टकानिर्मितं देवकुटकाकारं गृहम्) ततः चैलो बन्धुभिः सह नायात्। अथ कैश्चित्पुत्र-पौत्र-सहोदरादिभिर्गङ्गातीरमस्थीनि

कीचड़ और सेवार से युक्त किसी गढडे में चुपचाप रख दे। चिता की राखी आदि जल में फेंक दे। तब गोबर से उस जमीन को लिपवाकर चिता का भूमि शुद्ध करके और पहले की तरह चारों दिशाओं में शंकर आदि देवताओं को बलि दे। तब उन देवताओं का विसर्जन करे और बलि का अन्न जल में फेंक दे। तदनन्तर चिता की भूमि को ढाँकने के लिए उस

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

स्थान पर वृक्ष लगा दे, देवालय के समान कोई घर बना दे, या चबूतरा ही बनाकर छोड़ दे। तब अपने बान्धवों के साथ कपड़ों सहित स्नान करे। कुछ लोगों का यह मत है कि पुत्र, पौत्र तथा भाई आदि के साथ उन हड्डियों को गंगा के तीर लेता जाय। वहाँ स्नान करे, फिर हड्डियों पर पञ्चगव्य डाले। तब सुवर्ण, मधु, घृत तथा तिल रख कर उन्हें मिट्टी के पात्र में डालकर दक्षिण ओर निहारता और 'ॐ नमोऽस्तु धर्माय०' यह वाक्य कहता हुआ जल में जाय और मृत व्यक्ति

प्रेत० २६

नीत्वा स्नात्वा तान्यस्थीनि पञ्चगव्येन प्रोक्ष्य हिरण्य-मध्वाज्य-तिलैः संयोज्य मृत्पिण्डपुटे निधाय दक्षिणां दिशं पश्यन्। 'ॐ नमोऽस्तु धर्मायेति वदन् जले प्रविश्य, प्रेतो गतः स्वर्ग-कामो दक्षिणाभिमुखः 'स मे प्रीतः' इत्युक्त्वा गङ्गाम्भसि क्षिपेत्। ततः स्नात्वा उत्थाय सूर्यं पश्येत्। तत आचम्य। अद्य कृतैतदस्थिप्रक्षेपप्रतिष्ठार्थम् इदं हिरण्यमग्निदैवतं यथानामगोत्राय ब्राह्मणाय दक्षिणां दातुमहमुत्सृजे। इति दक्षिणां दद्यात्। एवं कृते प्रेतपुरःस्थितस्य, स्वर्गे गतिः स्यात्तु महेन्द्रतुल्या। यावदस्थि मनुष्यस्य गङ्गातोयेषु मज्जति। तावद्वर्षसहस्राणि स्वर्ग-

का ध्यान किये हुए उसकी स्वर्गकामना करता हुआ 'स मे प्रीतः' कहकर गंगाजी में डाल दे। तब स्नान करे और खड़ा होकर सूर्य की ओर देखे। फिर आचमन करे और 'अद्य कृतैतदस्थि०' यह संकल्पवाक्य पढ़कर ब्राह्मण को दक्षिणा दे। प्रेत का उत्तराधिकारी यदि प्रेत की हड्डियों को गंगाजी में डालता है तो प्रेत स्वर्गगामी होकर इन्द्र के समान हो जाता है। जितने वर्षों २६

Kirtikant Sharma Collection, Najafgarh
CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

तक जिस मृत मनुष्य की हड्डी गंगाजी में डूबी रहती है, वह मनुष्य उतने ही हजार वर्षों तक स्वर्गलोक में पूजा जाता है। जिस धर्मात्मा की हड्डियाँ गंगाजी में पड़ जाती हैं, वह कभी भी ब्रह्मलोक से नहीं लौटता, सदा वहीं रहता है। गौडपादाचार्य कहते हैं कि—दस दिन के भीतर जिसकी हड्डियाँ गंगाजी में पहुँच जाती हैं तो जो फल गंगाजी में मरने का होता है वही फल गंगा में हड्डी फेंकने में भी होती है। ब्रह्मपुराण कहता है कि—कोई मनुष्य यदि मातृकुल तथा पितृकुल के अतिरिक्त और

लोके महीयते ॥ गङ्गातोये तु यो ऽथ प्लवते स्थिमकर्मणः। न तस्य पुनरावृत्तिर्ब्रह्मलोकात् कथञ्चन ॥ गौडाः—दशाहाभ्यन्तरे यस्य गङ्गातोयेऽथ स्थिमज्जति। गङ्गायां मरणे यादृक् तादृक् फलमवाप्नुयात् ॥ ब्रह्मपुराणे—मातुःकुलं पितृकुलं वर्जयित्वा नराधमः। अस्थीन्य-न्यकुलोत्थानि नीत्वा चान्द्रायणं चरेत् ॥ अथ पर्णशरदाहः। अथाऽऽचारान्निरग्नेरप्यस्थि-पर्णशरदाहः। दाह्यशरीरा ताभे तदमथ घृतेनाभ्यज्य वस्त्रेणाऽऽच्छाद्य दहेत्पूर्ववत्। अस्थ्यलाभे

किसी कुल की हड्डियाँ उठाता है तो वह चान्द्रायण व्रत करने पर शुद्ध होता है। अब पर्णशरदाह विधान बताते हैं। आचारानुसार निरग्निक याने जो अग्निहोत्री न हो उनका भी पर्णशरदाह किया जा सकता है। यदि दहन करने योग्य शरीर न प्राप्त हो सके, याने परदेश में कोई की मृत्यु हो और पुत्र आदि को शरीर न मिले, कोई फूँक दिये हो अथवा चेचक आदि से मृत्यु हुई हो तो गाड़ दिया जाय तो बाद में उसकी हड्डियों को निकाल कर घी से तर कराके और वस्त्र से लपेटकर पूर्वोक्त विधि से

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

जलावे। यदि हड्डियाँ न मिल सकें तो तीन सौ आठ (३६०) पलाशपत्र से पुरुष बनाकर 'असौ स्वर्गाय लोकाय स्वाहा' कहकर जला दे। पुरुष निर्माण करते समय पहले नारियल से सिर बनाकर दो सरपत से दोनों जंघायें बनावे। यह पुरुष मृग-चर्म पर बनाकर ऊन के सूत्र या पलाश के पत्तों से लपेटकर उस पुरुष का माथा जौ के पिसान से लपेटे और ऊपर से भी मृगचर्म

षष्ठ्यधिकपलाशपत्रशतत्रयेण पुरुषाकृतिं विन्यस्य। ॐ असौ स्वर्गाय लोकाय स्वाहा। इति दहेत्। प्रथमतः शिरो निवेश्य, शरखण्डद्वयेन जंघाद्वयं कृष्णसारचर्मोपरि ऊर्णासूत्रैर्ग्रथितैः पलाशपत्रैर्वृतैर्वाऽऽवेष्ट्य शिरः यवचूर्णेन विलिप्य कृष्णसारचर्मणाऽऽच्छाद्य पूर्ववद्दहेत् (तद्विन्यासप्रकारः) शिरस्यशीत्यर्द्धं देयाद् ग्रीवायां च दशैव तु। बाह्वोश्चैव शतं दद्यादङ्गुलीषु तथा दश॥ उरसि त्रिंशतं दद्याद् विंशतिं जानुजङ्घयोः। पादाङ्गुलीषु दश वै एतत् पत्रविकल्पनम्। एवं पर्णैर्दग्ध्वा त्रिरात्रमशुचिर्भवेत्॥ तत्राऽशौचान्तपूर्वदिने सर्वेषां

ओढ़ाकर पूर्वोक्त विधि से जला दे। पुरुष के बनाने की विधि यह है—मस्तक में चालीस पत्र, गले में दश पत्र दोनों बाहुओं में सौ पत्र, उँगलियों में दश पत्र, छाती में तीस पत्र, पेट में बीस पत्र, लिङ्ग में चार पत्र, तीन-तीन दो अण्डकोशों में दोनों घुटनों में सौ पत्र, जानु तथा जंघा में तीस पत्र, और पैर की उँगलियों में दश पत्र देना चाहिए। इस तरह पर्णनिर्मित

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

Kirtikant Sharma Collection, Najafgarh

मनुष्य का दाह करने पर केवल तीन दिन का अशौच रहता है। जिस दिन अशौच समाप्त होने वाला हो उसके एक दिन पहले सभी बान्धव धोबी से अपने-अपने कपड़े धुला लें। फिर अशौच समाप्त होने वाले दिन सब घर लीप-पोतकर साफ करे। घर में जितने मिट्टी के बर्तन हों, उन्हें निकाल डाले। फिर सभी बान्धवों के साथ नदी तथा जला- भा०
प्रेत० शय पर जाकर स्नान करे। उसी रोज दसवाँ पिण्डदान करे। फिर जलाशय के तट पर केश, लोम और नखों को कटवाकर
२९

रजकद्वारा वस्त्रशुद्धिं कारयित्वा। अशौचान्तदिवसे गृहशुद्धिं कृत्वा मृण्मयभाण्डानि त्यक्त्वा स्नात्वा दशमं पिण्डं दत्त्वा बहिरुदकान्ते केश-लोम नखान् यथायोग्यं वापयित्वा तिलतैलेनाऽभ्यक्त्वा गौरसर्षपकल्केन शिरश्चोन्मृज्य स्नात्वा प्रेतस्पृष्टवासांसि नापिताय दद्यात्। अथाऽऽचम्य वाग्यतो वासो युग्महतं नवं शुद्धं पुरातनं वा युक्तमव्रणं परिधाय। अश्माविष्टो गां सुवर्णं गोरोचनं दधि-दूर्वा-सित-सर्षपान् ब्राह्मणाऽग्निं क्षत्रियो वाहनायुधौ वैश्यः प्रतोद-प्रग्रहौ शूद्रो

तिल का तेल लगावे और सफेद सरसों के उबटन से माथा मलकर, स्नान करे। प्रेत से स्पर्श किया हुआ कपड़ा नाई को दे दे। तब आचमन करके एक जोड़ा कपड़ा जो कि फटा न हो अर्थात् नया हो और नया न हो तो भी शुद्ध, जोड़ से रहित और छेदा न हो तो पुराना ही वस्त्र लेकर पहने। फिर श्राद्धकर्ता तथा उसके साथी क्षण भर पत्थर पर बैठें और गौ, सुवर्ण, २९
गोरोचन, दही, दूब, सफेद सरसों छूवें। इसके अतिरिक्त ब्राह्मण अग्नि, क्षत्रिय वाहन तथा शस्त्र, वैश्य चाबुक और

पगहा तथा शूद्र छड़ी का स्पर्श कर मंगल वाक्यो का उच्चारण करता हुआ अथवा ब्राह्मणों द्वारा स्वस्तिवाचन कराके घर के भीतर जाय। इस दिन ब्राह्मण पञ्चगव्यपान करते है—यह रीति है। पराशर का मत है कि दसवें दिन गाँव से बाहर जल में स्नान करे। वहीं पर अपना कपड़ा त्याग दे और केश, दाढ़ी, मूँछ और नाखून वही कटवा डाले। उस दिन सामुद्र लवण या

यष्टिसंस्पृश्य मङ्गलानि सङ्कीर्तयन् ब्राह्मणान् स्वस्तिं वाचयित्वा गृहं प्रविशेत्। अत्र दिने ब्राह्मणाः पञ्चगव्यपानं कुर्वन्तीति समाचारः। दशमेऽहनि सम्प्राप्ते स्नानं कुर्याद् बहिर्जले। तत्र त्याज्यानि वासांसि केश-श्मश्रु-नखानि च॥ इति पराशरः। तत्र सामुद्रसैन्धवलवणानि यव-मुद्ग-कल्माष-गोक्षीर-दधि-घृतखण्डान्यश्नीयात्। मधुमांसस्त्रीवर्जिता भवेयुः। सपिंडा एकवारं भुञ्जीयुः। इति नियमाः।

अथ दशगात्रश्राद्धारम्भः। तत्रादौ पुत्राद्यधिकारिणो लगुडमादाय मृण्मये नूतनभाण्डेन जलमानीय ग्रामाद् हिर्देवतायतने गृहद्वारि शुचितीरे वा पिण्डदानादेशान्यां दिशि अग्निं प्रज्वाल्य

सेंधा नमक, यव, मूँग, उरदी, गौ का दूध, दही, घी, खाँड़ इत्यादि भोजन करे और मधु, मांस तथा स्त्री से पृथक्-पृथक् रहे। सपिण्ड के लोग एक बार भोजन करें। यह नियम कहा गया है। अब दशगात्र की विधि बताते हैं। उसमें सर्वप्रथम कर्तव्य यह है कि प्रेत के पुत्र आदि अधिकारी हाथ में दण्ड लिए मिट्टी के बर्तन में जल लेकर गाँव से बाहर किसी देवस्थान पर, घर के दरवाजे पर या किसी नदी के तट पर पिण्डदान देने का निश्चय करें। निश्चित स्थान की ईशान दिशा में आग जलावे। फिर दो

Kirtikant Sharma Collection, Najafgarh
CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

पसर चावल धोकर अपने हाथ से खीर पकावे। फिर ऐसी जगह, जहाँ की जमीन दक्षिण की ओर ढालू हो, उसे गोबर से लिपवाकर सफेद मिट्टी से दक्षिण को ढालू वेदी बनावे। तब आचमन कर, अपसव्य हो दहिना घुटना मोड़कर दक्षिण की ओर

तण्डुलप्रसृतिद्वयं प्रक्षाल्य सुभृतं स्वयं पचेत्। ततो दक्षिणप्रवणे भूभागे गोमयोपलिप्ते गौर-मृत्तिकया पिण्डार्थं दक्षिणप्रवणं स्थानं निर्माय आचान्तः कृताऽपसव्यो दक्षिणाभिमुखः पातित-वामजानुः पिण्डस्थानोपरि दक्षिणाग्रं कुशत्रयमास्तीर्य पुटकादौ तिल-जल-गन्ध-पुष्पाणि प्रक्षिप्य तत्पात्रं वामहस्ते कृत्वा मोटक-तिल जलान्यादाय, ॐ अद्यामुकगोत्र पितरमुकप्रेत शिरःपूरकप्रथम-पिण्डस्थानेऽत्रावने निक्व ते मया दीयते तवोपतिष्ठताम्। इति कुशोपरि अवनेजनं दद्यात्। ततस्तिल-घृत-मधुयुक्तं दुग्धसिक्तं तप्तमेव पिण्डमादाय मोटकतिल-जलानि चादाय, ॐ अद्यामुकगोत्र पितरमुकप्रेत एष शिरःपूरकप्रथमपिण्डस्ते मया दीयते तवोपतिष्ठताम्। इति कुशोपरि अवनेजन स्थाने पिण्डं दद्यात्। ततः प्रत्यवनेजनम्। पूर्वदत्ताऽवशिष्टाऽवनेजनपात्रमादाय मोटक तिल-जलानि

मुख करके बैठे। वेदी पर दक्षिण को अग्रभाग करके तीन कुश बिछावे। दोने या कटोरे में तिल, जल, गन्ध, पुष्प डालकर बायें हाथ में वह पात्र तथा मोटक, तिल और जल लेकर, 'अद्यामुक गोत्र०' यह वाक्य पढ़कर वेदी पर बिछी हुई कुशाओं पर अवनेजन जल डाले। इसके बाद तिल, घृत और मधु से युक्त और दुग्ध से सिक्त गरम पिण्ड तथा मोटक, तिल और जल को हाथ

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

Kirtikant Sharma Collection, Najafgarh

में लेकर 'अद्यामुकगोत्र०' यह वाक्य पढ़कर वेदी पर उस जगह रखे जहाँ कि पहले अवनेजन जल डाला। तब पूर्व में अव नेजन देने से कुछ अवशिष्ट जलयुक्त पात्र तथा मोटक, तिल जल, लेकर 'अद्यामुकगोत्र०' यह वाक्य पढ़कर पिण्ड पर जल डाल

चादाय अद्यामुकगोत्र पितरमुकप्रेत शिरःपूरकप्रथमपिण्डेऽत्र प्रत्यवने निक्व ते मया दीयते तवोपतिष्ठताम्। इति पिण्डोपरि दद्यात्। ततः प्रेतमुद्दिश्य तूष्णीम् एव गन्ध-पुष्प-खश-भृङ्गराजपत्र-राल-धू -दीप-ताम्बूल-पूगीफल-ऊर्णातन्तुमयबहुवस्त्राणि पिण्डे दद्यात्। अद्यामुकगोत्र पितरमुकप्रेत शिरःपूरकप्रथमपि डे एतानि ऊर्णासूत्रोशीरचन्दनभृ राजपत्रराल धूपदीपादीनि ते मया दीयन्ते तवोपतिष्ठताम्। ततो यावद्वाष्पं निःसरति तावत् पिण्डाभिमुखस्तिष्ठेत्। ततोऽपसव्यादिनैव। अद्याऽमुकगोत्र पितरमुकप्रेत शिरःपूरकप्रथमपिण्डे एष तिलतोयाञ्जलिस्ते मया दीयते तवोपतिष्ठ-ताम्। इत्येकं तिलतोयाञ्जलिं पिण्डोपरि दद्यात्। एवं पिण्डसमीपे एकं तिलतोयपूर्णपात्रं दद्यात्। अद्याऽमुकगोत्र पितरमुकप्रेत पि डसमीपे एतत्तिलतोयपूर्णपात्र ते मया दीयते तवोपतिष्ठताम्।

दे। तत्पश्चात् प्रेत के निमित्त चुपचाप पिण्ड के ऊपर खस, चन्दन, भृङ्गराजपत्र, पुष्प, धूप, दीप, पान, सोपाड़ी और ऊन का सूत चढ़ाकर मोटक, तिल, जल हाथ में लेकर 'अद्यामुकगोत्र०' आदि वाक्य दे। यह जबतक पिण्ड में से भाप निकलता रहे तब तक पिण्ड के सामने बैठा रहे। तदनन्तर अपसव्य ही से मोटकादि लेकर 'अद्यामुकगोत्र०' आदि वाक्य पढ़े और प्रथम शिरः-

पूरक पिण्डके ऊपर एक तिलयोयांजलि देवे। इसी प्रकार 'अद्यामुकगोत्र०' आदि पढ़कर तिल, जल से भरा एक पूर्णपात्र पिण्ड के समीप रखे। इसके बाद पिण्ड के दोनों तरफ समीप में त्रिकाष्ठिका रखे और उस पर जल तथा दूध से भरा हुआ पात्र (दोनिया) रखे और 'श्मशानाऽनलदग्धोऽसि०' इस मन्त्र को पढ़कर पिण्ड पर देवे। सब करने के बाद सभी चीजें जल में डाल दे।

ततः पिण्डपार्श्वयोस्त्रिकाष्ठिकारोपणम्। तस्या उपरि जल-दुग्धपात्रं च निदध्यात्। श्मशानाऽनल-दग्धोऽसि परित्यक्ताऽसि बान्धवैः। इदं नीरम् इदं क्षीरमत्र स्नहि इदं पिब ते मया दीयते तवो-पतिष्ठताम्। इति पिण्डोपरि दद्यात्, पश्चाज्जले सर्वं क्षिपेत्। तत उपलिप्तायां भूमौ माल्यं पानीयं दीपं च निधाय। अद्याऽमुकगोत्र पितरमुकप्रेत इदं माल्यं परिधेहि ते मया दीयते तवोप-तिष्ठताम्। अद्यामुकगोत्र पितरमुकप्रेत इदं पानीयं पिब ते मया दीयते तवोपतिष्ठताम्। अद्यामुक-गोत्र पितरमुकप्रेत इमं दीपं पश्य ते मया दीयते तवोपतिष्ठताम्। इति दद्यात्। अथवा सायङ्काले गृहद्वारि प्रेतमुद्दिश्य दशरात्रं त्रिरात्रं वा दद्यात्। तत्र क्रमः। रात्रौ गोमयोपलिप्तायां

फिर उस जमीन को गोबर से लीपकर वहाँ पर माला, जल और दिया जलाकर रखे। मोटक, तिल जल लेकर 'अद्यामुक-गोत्र०' यह वाक्य पढ़कर जल छोड़े। अथवा घर की दुआरी पर ही प्रेत के उद्देश्य से त्रिकाष्ठिका रखकर पहले की तरह संकल्प करे और कहे कि—'इदं स्नाहिइदं पिब इदं परिधेहि अनेन पश्य।' इसी प्रकार पूर्ववत् दूसरे दिन से लेकर दस दिन

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

प्राप्तिकाम इमां सोपकरणां शय्यां विष्णुदैवत्याम् अमुकगोत्रायाऽमुकशर्मणे ब्राह्मणाय तुभ्यमहं सम्प्रददे। इति विप्रकरे दद्यात्। ॐ स्वस्तीति प्रतिवचनम्। ततो दक्षिणाद्रव्यमादाय। अद्य कृतैतत्सोपकरणशय्यादानप्रतिष्ठार्थमिदं दक्षिणाद्रव्यम् अमुकगोत्रायाऽमुकशर्मणे ब्राह्मणाय तुभ्यमहं सम्प्रददे। ॐ स्वस्ति॰। सोपकरणां शय्यां स्पृशेत्। तत आचम्य, ॐ फलवस्त्र समन्वित-काञ्चनपुरुषाय नमः। ॐ ब्राह्मणाय नमः। इति पुष्पाऽक्षतैः त्रिः सम्पूज्य। इदं फलवस्त्र-समन्वितं काञ्चनपुरुषं ददानि, इति द्विजकरे जलदानम्। ददस्वेति प्रतिवचनम्। ततो वारिणा देयदव्यसेचनम्। कुशत्रयतिल-जलान्यादाय। अद्याऽशौचान्तद्वितीयेऽह्नि अमुकगोत्रस्य पितरमुकप्रेतस्य स्वर्गप्राप्तिकाम इदं फलवस्त्र-समन्वितं काञ्चनपुरुषं विष्णुदैवतममुकगोत्रायाऽमुकशर्मणे ब्राह्मणाय तुभ्यमहं सम्प्रददे। इति द्विजकरे दद्यात्। ॐ स्वस्तीति प्रतिवचनम्। ततः कुशत्रयतिलजलान्यादाय दक्षिणाद्रव्यं चादाय। अद्य

शय्या को छूवे। उसके बाद आचमन करे, कांचन पुरुष तथा ब्राह्मण को चन्दन, फूल इत्यादि से तीन वार पूजन करे, 'इदं फलवस्त्र-समन्वितं काञ्चनपुरुषं ददानि॰' कह कर ब्राह्मण के हाथ में जल दे, ब्राह्मण कहे ददस्व॰' इसके बाद कांचन पुरुष पर जल

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

छिड़के। तीन कुशा तिल जल लेकर 'अद्याऽशौचान्त०' इत्यादि पढ़कर कांचन पुरुष को दान कर ब्राह्मण को दान दे। ब्राह्मण 'ॐ स्वस्ति' कहे। फिर तीन कुशा तिल, जल, दक्षिणा, द्रव्य लेकर 'कृतैतत्०' इस वाक्य को पढ़कर ब्राह्मण को दक्षिणा दे, ब्राह्मण

कृतैतत्फलवस्त्रसमन्वितकाञ्चनपुरुषदानप्रतिष्ठार्थमिदं दक्षिणाद्रव्यम् अमुकगोत्रायाऽमुकशर्मणे ब्राह्मणाय तुभ्यमहं सम्प्रददे। ॐ स्वस्तीति प्रतिवचनम्। ततः काञ्चनपुरुषं स्पृशेत्। आचम्य। कुशत्रय-तिल-जलान्यादाय। अद्याऽशौचान्तद्वितीयेऽह्नि अमुकगोत्रस्य पितुरमुकप्रेतस्य स्वर्गप्राप्तिकामो द्विजदम्पतिपूजनमहं करिष्ये। ततो द्विजदम्पतीभ्यां नमः। इति सम्पूज्य। ततः सूपौदनदानम्। अद्याशौचान्तद्वितीयेऽह्नि अमुकगोत्रस्य पितुरमुकप्रेतस्य प्रेतत्वविमुक्तिकाङ्क्षी स्वर्गाद्युत्तमलोकवासकाम इमानि सूपौदनपञ्चपात्राणि भोजनपाकार्थम् अमुकगोत्रायाऽमुकशर्मणे ब्राह्मणाय तुभ्यमहं सम्प्रददे। ॐ स्वस्ति। दक्षिणाद्रव्यं चादाय। अद्य कृतैतत्सूपौदनपञ्चपात्रदानकर्मणः साङ्गतासिद्ध्यर्थं दक्षिणाद्रव्यममुकगोत्रायाऽमुकशर्मणे ब्राह्मणाय तुभ्यमहं सम्प्रददे। तौ नमस्कुर्यात्।

'ॐ स्वस्ति' कहे तथा कांचन पुरुष को छूवे। फिर आचमन करके द्विजदम्पती का संकल्प पूर्वक पूजन करे। इसके बाद [सूपौदन] याने पाँच बर्तन का दान करे। भोजन पाक के लिये ब्राह्मण 'ॐ स्वस्ति' कहे, तथा तीन कुशा तिल जल दक्षिणा लेकर संकल्प पढ़कर ब्राह्मण को दक्षिणा दे, ब्राह्मण 'ॐ स्वस्ति' कहे, यजमान दोनों को नमस्कार करे। अब वृषोत्सर्ग का क्रम कहते हैं—आचमन

Kirtikant Sharma Collection, Najafgarh
CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

कर तीन कुशा तिल जल लेकर 'अद्याऽशौचान्त०' पढ़कर वृषोत्सर्ग का संकल्प करे। यदि नीलवृष हो तो 'नीलवृषोत्सर्ग०' संकल्प

अथ वृषोत्सर्गः। तत आचान्तः पूर्वाभिमुख उपविश्य, कुशत्रय-तिल-जलान्यादाय। अद्याऽशौचान्तद्वितीयेऽह्नि अमुकगोत्रस्य पितुरमुकप्रेतस्य मोक्षकामः सोपकरणवत्सतरीचतुष्टयसहितवृषोत्सर्गमहं करिष्ये। (नीलवृषप्राप्तौ नीलपदप्रक्षेपः) तत्राऽऽदौ ईशाने रुद्रवेद्यां कलशं स्थापयेत्। ॐ मही द्यौः पृथिवी च न ऽइमं यज्ञं मिमिक्षताम्। पिपृतान्नो भरीमभिः॥ इति भूमिं स्पृष्ट्वा। ॐ ओषधयः समवदन्त सोमेन सह राज्ञा यस्मै कृणोति ब्राह्मणस्तꣳ राजन्पारयामसि॥ इति सप्तधान्यं विकिरेत्। ॐ आजिघ्र कलशं मह्या त्वा विशंत्विन्दवः। पुनरूर्ज्जा निवर्तस्व सा नः सहस्रन्धुक्ष्वोरुधारा पयस्वती पुनर्म्माविशतान्द्रयिः॥ इति धान्योपरि कलशं स्थापयेत्। ॐ वरुणस्योत्तम्भनमसि व्वरुणस्य स्कम्भसर्ज्जनी स्थो व्वरुणस्य ऽऋतसदन्न्यसि व्वरुणस्य ऽऋतसदनमसि व्वरुस्य ऽऋत सदनमासीद॥ इति कलशे जलं पूरयेत्। ॐ त्वां गन्धर्वा ऽअखनंस्त्वामिन्द्रस्त्वां बृहस्पतिः। त्वामोषधे सोमो राजा व्विद्वान्यक्ष्मादमुच्यत॥ इति कलशे गन्धं

में कहे, पहिले ईशान में रुद्रवेदी पर कलश स्थापन की विधि से कलश का स्थापन करे, उस पर वरुण का पूजन करे।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

क्षिपेत्। ॐ या ऽओषधीः पूर्व्वा जाता देवेभ्यस्त्रियुगम्पुरा। मनैनु व्वभ्रूणामहꣳ शतं धामानि सप्त च॥ इति कलशे सर्व्वौषधीः क्षिपेत्। ॐ काण्डात्काण्डात्प्ररोहन्तो परुषः परुस्परि एवा नो दूर्व्वे प्रतनु सहस्रेण शतेन च। इति कलशे दुर्व्वाङ्कुरान् क्षिपेत्। ॐ अश्वत्थे वो निषदनम्पर्णे वो वसतिष्कृता। गोभाज ऽइत्किलासथ यत्सनवथ पुरुषम्॥ इति कलशे पञ्चपल्लवान् क्षिपेत्। ॐ स्योना पृथिवि नो भवान्नृक्षरा निवेशनी। यच्छा नः शर्म्म सप्रथाः॥ इति कलशे सप्तमृत्तिकां क्षिपेत्। ॐ याः फलनीर्या ऽअफला ऽअपुष्पा याश्च पुष्पिणीः। बृहस्पति सूतास्ता नो मुञ्चन्त्वꣳ हसः॥ इति कलशे पूगीफलं क्षिपेत्। ॐ परि वाजपतिः कविरग्निर्हव्यान्यक्रमीत्। दधद्रत्नानि दाशुषे॥ इति कलशे पञ्चरत्नानि क्षिपेत्। ॐ हिरण्यगर्भ्भः समवर्त्तताग्रे भूतस्य जातः पतिरेक ऽआसीत्। स दाधार पृथिवीं द्यामुतेमां कस्मै देवाय हविषा विधेम॥ इति कलशे हिरण्यं क्षिपेत्। ॐ सुजातो ज्योतिषा सह शर्म्म वरूथमासदत्स्वः। व्वासो ऽअग्ने व्विश्वरूपꣳ संव्ययस्व व्विभावसोः॥ इति युग्मवस्त्रेण कलशं वेष्टयेत्। ॐ पूर्णा दर्व्वि परापत सुपूर्णा पुनरापत व्वस्नेव विक्रीणावहा ऽइषमूर्ज्जꣳ शतक्रतो॥ इति कलशोपरि पूर्णपात्रं न्यसेत्। ॐ तत्त्वा

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

'नमस्ते रुद्र० इस मन्त्र से कलश पर रुद्र का षोडशोपचार से पूजन करे।

यामि ब्रह्मणा व्वन्दमानस्तदाशास्ते यजमानो हविर्भिः। अहेडमानो व्वरुणेह बोध्युरुशꣳ स मा न ऽआयुः प्रमोषीः॥ इति वरुणमावाह्य सम्पूज्य तस्योपरि रुद्रं पूजयेत्। ॐ नमस्ते रुद्र मन्यव ऽउतो त इऽषवे नमः। बाहुभ्यामुत ते नमः॥ ॐ रुद्राय नमः, ॐ रुद्रमावाहयामि। ॐ मनो जूतिर्जुषनामाज्यस्य बृहस्पतिर्यज्ञमिमं तन्नोत्वरिष्टं यज्ञꣳ समिमन्दधातु। विश्वे देवा स ऽइह मादयन्तामों प्रतिष्ठ॥ अस्मिन् कलशे वरुणरुद्राः सुप्रतिष्ठिता वरदा भवत। ततो षोडशोपचारैः सम्पूज्य। अनया पूजया वरुणरुद्राः प्रीयन्ताम्। ततः पुरुषसूक्तं षोडशमन्त्रान् रुद्राध्यायं षष्ट्युत्तर-षष्टिमन्त्राः। तद्यथा। ॐ सहस्रशीर्षा पुरुषः सहस्राक्षः सहस्रपात। स भूमिꣳ सर्व्वतस्पृत्वात्त्य-तिष्ठद्दशाङ्गुलम्॥ १॥ ॐ पुरुष ऽएवेदꣳ सर्व्वं यद्भूतं यच्च भाव्यम्। उतामृतत्वस्येशानो यदन्नेनातिरोहति॥ २॥ ॐ एतावानस्य महिमातो ज्ज्यायाँश्च पूरुषः। पादोऽस्य विश्वा भूतानि त्रिपादस्यामृतन्दिवि॥ ३॥ ॐ त्रिपादूर्ध्व ऽउदैत्पुरुषः पादोऽस्येहाभवत्पुनः। ततो विष्वङ् व्य-क्रामत्साशनानशने ऽअभि॥ ४॥ ॐ ततो विराडजायत विराजोऽअधि पूरुषः। स जातो

इसके बाद पुरुषसूक्त 'सहस्रशीर्षा १६ मन्त्र, नमस्ते रुद्राध्याय ६६ मन्त्र' पढ़े।

Kirtikant Sharma Collection, Najafgarh
CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

ऽअत्यरिच्यत पश्चाद्भूममथो पुरः ॥ ५ ॥ ॐ तस्माद्यज्ञात्सर्व्वहुतः सम्भृतम्पृषदाज्यम् । पशूँस्ताँश्चक्रे वायव्व्यानारण्या ग्राम्याश्च ये ॥ ६ ॥ ॐ तस्माद्यज्ञात्सर्व्वहुत ऽऋचः सामानि जज्ञिरे । छन्दाꣳसि जज्ञिरे तस्माद्यजुस्तस्मादजायत ॥ ७ ॥ ॐ तस्मादश्वा ऽअजायन्त ये के चोभयादतः । गावो ह जज्ञिरे तस्मात्तस्माज्जाता ऽअजावयः ॥ ८ ॥ ॐ तं य्यज्ञम्बर्हिषि प्प्रौक्षन्न्पुरुषञ्जातमग्रतः । तेन देवा ऽअयजन्त साद्ध्या ऽऋषयश्च ये ॥ ९ ॥ ॐ यत्पुरुषं व्व्यदधुः कतिधा व्व्यकल्पयन् । मुखङ्किमस्यासीत्किम्बाहू किमूरू ऽपादा ऽउच्च्येते ॥ १० ॥ ॐ ब्राह्मणोऽस्य मुखमासद्बाहूराजन्न्यः कृतः । ऊरू तदस्य यद्वैश्यः पद्भ्याꣳशूद्रो ऽअजायत ॥ ११ ॥ ॐ चन्द्रमा मनसो जातश्चक्षोः सूर्य्यो ऽअजायत । श्रोत्राद्वायुश्च प्प्राणश्च मुखादग्निरजायत ॥ १२ ॥ ॐ नाभ्या ऽआसीदन्तरिक्षꣳ शीर्ष्णो द्यौः समवर्त्तत । पद्भ्यां भूमिर्दिशः श्रोतात्तथा लोकाँ २॥ ऽअकल्पयन् ॥ १३ ॥ ॐ यत्पुरुषेण हविषा देवा यज्ञमतन्न्वत । वसन्तोऽस्यासीदाज्यङ्ग्रीष्म ऽइध्मः शरद्धविः ॥ १४ ॥ ॐ सप्तास्यासन्न्परिधयस्त्रिः सप्त समिधः कृताः । देवा यद्यज्ञन्तन्न्वाना ऽअबध्नन्न्पुरुषं पशुम् ॥ १५ ॥ ॐ यज्ञेन यज्ञमयजन्त देवास्तानि धर्म्माणि प्प्रथमान्न्यासन् । ते ह नाकम्महिमानः सचन्त यत्र

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

पूर्व्वे साद्ध्याः सन्ति देवाः ॥ १६ ॥ इति पुरुषसूक्तम् । अथ रुद्राध्यायः । ॐ नमस्ते रुद्र-
मन्न्यव ऽउतो त ऽइषवे नमः । बाहुभ्यामुत ते नमः ॥ १ ॥ ॐ या ते रुद्र शिवा तनूरघोरा-
ऽपापकाशिनी । तया नस्तन्न्वा शन्तमया गिरिशन्ताभिचाकशीहि ॥ २ ॥ ॐ यामिषुङ्गिरिशन्त
हस्ते ब्विभर्ष्यस्तवे । शिवाङ्गिरिक्षत्र ताङ्कुरु मा हिꣳसीः पुरुषं जगत् ॥ ३ ॥ ॐ शिवेन व्वचसा
त्वा गिरिशाच्छा व्वदामसि । यथा नः सर्व्वमिज्जगदयक्ष्मा सुमना ऽअसत् ॥ ४ ॥ ॐ अद्ध्य-
वोचदधिवक्ता प्रथमो देव्व्यो भिषक् । अहींछंश्च सर्व्वाञ्जम्भयन्त्सर्व्वाश्च यातुधान्न्यो ऽधराचीः
परासुव ॥ ५ ॥ ॐ असौ यस्ताम्म्रो ऽअरुण ऽउत बभ्रुः सुमङ्गलः । ये चैनꣳ रुद्रा ऽभितो
दिक्षु श्रिताः सहस्रशोऽवैषाꣳहेड ईमहे ॥ ६ ॥ ॐ असौ यो ऽवसर्प्पति नीलग्रीवो व्विलो-
हितः । उतैनङ्गोपा ऽअदृश्रन्नदृश्रन्नुदहार्य्यः स दृष्टो मृडयाति नः ॥ ७ ॥ ॐ नमोऽस्तु नील-
ग्रीवाय सहस्राक्षाय मीढुषे । अथो ये ऽअस्य सत्त्वानोऽहं तेभ्यो ऽकरन्नमः ॥ ८ ॥ ॐ प्रमुञ्च
धन्न्वनस्त्वमुभयोरात्न्योर्ज्ज्याम् । याश्च ते हस्त ऽइषवः परा ता भगवो व्वप ॥ ९ ॥ ॐ
ब्विज्ज्यन्धनुः कपर्दिनो ब्विशल्ल्यो बाणवाँ २॥ ऽउत । अनेशन्नस्य या ऽइषव ऽआभुरस्य निष-

Kartikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

क्षधिः ॥ १० ॥ ॐ या ते हेतिर्मीढुष्टम हस्ते बभूव ते धनुः । तयाऽस्मान्न्विश्वतस्त्वमयक्ष्मया परिभुज ॥ ११ ॥ ॐ परि ते धन्वनो हेतिरस्मान्वृणक्तु विश्वतः । अथो य ऽइषुधिस्तवारे ऽअस्मन्निधेहि तम् ॥ १२ ॥ ॐ अवतत्य धनुष्ट्वꣳ सहस्राक्ष शतेषुधे । नीशीर्य्य शल्यानां मुखा शिवो नः सुमना भव ॥ १३ ॥ ॐ नमस्त ऽआयुधायानाततायधृष्णवे । उभाभ्यामुत ते नमो बाहुब्भ्यान्तव धन्वने ॥ १४ ॥ ॐ मा नो महान्तमुत मा नो ऽअर्ब्भकम्मा न ऽउक्षन्तमुत मा न ऽउक्षितम् । मा नो वधोः पितरम्मोत मातरम्मा नः प्रियास्तन्वो रुद्र रीरिषः ॥ १५ ॥ ॐ मा नस्तोके तनये मा न ऽआयुषि मा नो गोषु मा नो ऽअवष्वेषु रीरिषः । मा नो वीरान्नुद्रुद्रभामिनो वधीर्हविष्मन्तः सदमित्त्वा हवामहे ॥ १६ ॥ ॐ नमो हिरण्यबाहवे सेनान्ये दिशाञ्च पतये नमो नमो वृक्षेब्भ्यो हरिकेशेब्भ्यः पशूनाम्पतये नमो नमः शष्पिञ्जराय त्विषीमते पथीनाम्पतये नमो नमो हरिकेशायोपवीतिने पुष्टानाम्पतये नमः ॥ १७ ॥ ॐ नमो बब्भ्लुशाय व्याधिनेऽन्नानाम्पतये नमो नमो भवस्य हेत्यै जगताम्पतये नमो नमो रुद्रद्रायातितायिने क्षेत्राणाम्पतये नमो नमः सूतायाहन्त्यै वनानाम्पतये नमः ॥ १८ ॥ ॐ नमो

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

रोहिताय स्थपतये वृक्षाणाम्पतये नमो नमो भुवन्तये व्वारिवस्कृतायौषधीनाम्पतये नमो नमो मन्त्रिणे व्वाणिजाय कक्षाणाम्पतये नमो नम ऽउच्चैर्घोषायाक्रन्दयते पतीनाम्पतये नमः ॥ १९ ॥ ॐ नमः कृत्स्नायतया धावते सत्त्वनाम्पतये नमो नमः सहमानाय निव्व्याधिन ऽआव्याधिनीनां पतये नमो नमो निषङ्गिणे ककुभाष स्तेनानाम्पतये नमो नमो निचेरवे परिचरायारण्यानाम्पतये नमः ॥ २० ॥ ॐ नमो वञ्चते परिवञ्चते स्तायूनाम्पतये नमो नमो निषङ्गिण ऽइषुधिमते तस्क-राणाम्पतये नमो नमः सृकायिब्भ्यो जिघाँसद्भ्यो मुष्णताम्पतये नमो नमो ऽसिमद्भ्यो नक्त-ञ्चरद्भ्यो विकृन्तानाम्पतये नमः ॥ २१ ॥ ॐ नम ऽउष्णीषिणे गिरिचराय कुलुञ्चानाम्पतये नमो नम ऽइषुमद्भ्यो धन्वायिब्भ्यश्च वो नमो नम ऽआतन्वानेब्भ्यः प्रतिदधानेब्भ्यश्च वो नमो नम ऽआयच्छद्भ्योऽस्यद्भ्यश्च वो नमः ॥ २२ ॥ ॐ नमो व्विसृजद्भ्यो व्विध्यद्भ्यश्च वो नमो नमः स्वपद्भ्यो जाग्रद्भ्यश्च वो नमो नमः शयानेब्भ्य ऽआसीनेब्भ्यश्च वो नमो नमस्तिष्ठद्भ्यो धाव-द्भ्यश्च वो नमः ॥ २३ ॥ ॐ नमः सभाब्भ्यः सभापतिब्भ्यश्च वो नमो नमोऽश्वेब्भ्योऽश्व-पतिब्भ्यश्च वो नमो नम ऽआव्व्याधिनीब्भ्यो व्विविद्धयन्तीब्भ्यश्च वो नमो नम ऽउगणाब्भ्यस्तृꣳ-

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

हतीभ्यश्च वो नमः ॥ २४ ॥ ॐ नमो गणेभ्यो गणपतिभ्यश्च वो नमो नमो व्रातेभ्यो व्रातपतिभ्यश्च वो नमो नमो गृत्सेभ्यो गृत्सपतिभ्यश्च वो नमो नमो विरूपेभ्यो विश्वरूपेभ्यश्च वो नमः ॥२५॥ ॐ नमः सेनाभ्यः सेनानिभ्यश्च वो नमो नमो रथिभ्यो ऽअरथेभ्यश्च वो नमो नमः क्षत्तृभ्यः संगृहीतृभ्यश्च वो नमो नमो महद्भ्यो ऽअर्भकेभश्च वो नमः ॥ २६ ॥ ॐ नमस्तक्षभ्य रथकारेभ्यश्च वो नमो नमः कुलालेभ्यः कर्म्मारेभ्यश्च वो नमो नमो निषादेभ्यः पुञ्जिष्टेभ्यश्च वो नमो नमः श्वनिभ्यो मृगयुभ्यश्च वो नमो नमः ॥२७॥ ॐनमः श्वभ्यः श्वपतिभ्यश्च वो नमो नमो भवाय च रुद्राय च नमः शर्व्वाय च पशुपतये च नमो नीलग्रीवाय च शितिकण्ठाय च ॥ २८॥ ॐ नमः कपर्द्दिने च व्युप्तकेशाय च नमः सहस्राक्षाय च शतधन्वने च नमो गिरिशयाय च शिपिविष्टाय च नमो मीढुष्टमाय चेषुमते च ॥२९॥ ॐ नमो ह्रस्वाय च वामनाय च नमो बृहते च वर्षीयसे च नमो वृद्धाय च सवृधे च नमोऽग्र्याय च प्रथमाय च ॥३०॥ ॐ नम ऽआशवे चाजिराय च नमः शीघ्राय च शीभ्याय च नमः ऊर्म्याय चावस्वन्याय च नमो नादेयाय च द्वीप्याय च ॥३१॥ ॐ नमो ज्ज्येष्ठाय च कनिष्ठाय च नमः पूर्व्वजाय चापरजाय च नमो मध्यमाय

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

चापगल्ब्भाय च नमो जघन्न्याय च बुध्न्याय च ॥३२॥ ॐ नमः सोब्भ्याय च प्प्रतिसर्य्याय च नमो याम्म्याय च क्षेम्म्याय च नमः श्लोक्क्याय चावसान्न्याय च नम ऽउर्व्वर्य्याय च खल्ल्याय च ॥३३॥ नमो व्वन्न्याय च कक्ष्नाय च नमः श्श्रवाय च प्प्रतिश्श्रवाय च नम ऽआशुषेणाय चाशुरथाय च नमः शूराय चावभेदिने च ॥ ३४ ॥ ॐ नमो विल्मिने च कवचिने च नमो व्वर्म्मिणे च व्वरूथिने च नमः श्श्रुताय च श्श्रुतसेनाय च नमो दुन्दुब्भ्याय चाहनन्न्याय च ॥ ३५ ॥ ॐ नमो धृष्णवे च प्प्रमृशाय च नमो निषङ्गिणे चेषुधिमते च नमस्तीक्ष्णेषवे चायुधिने च नमः स्वायुधाय च सुधन्न्वने च ॥ ३६ ॥ ॐ नमः स्रुत्याय च पत्थ्याय च नमः काट्याय च नीप्याय च नमः कूल्याय च सरस्याय च नमो नादेयाय च व्वैशन्ताय च ॥ ३७ ॥ ॐ नमः कूप्याय चावटयाय च नमो ब्रीद्ध्र्याय चातप्याय च नमो मेग्धाय च व्विद्यूत्याय च नमो व्वर्ष्याय चावर्ष्ष्याय च ॥ ३८ ॥ ॐ नमो व्वात्याय च रेष्याय च नमो व्वास्तव्याय च व्वास्तुपाय च नमः सोमाय च रुद्राय च नमस्ताम्म्राय चारुणाय च ॥ ३९ ॥ ॐ नमः शङ्गवे च पशुपतये च नम ऽउग्ग्राय च भीमाय च नमो ऽअग्रेवधाय च दूरेवधाय च नमो हन्त्रे च हनी-

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

यसे च नमो व्वृक्षेब्भ्यो हरिकेशेब्भ्यो नमस्ताराय ॥ ४० ॥ ॐ नमः शम्भवाय च मयोभवाय च नमः शङ्कराय च मयस्कराय च नमः शिवाय च शिवतराय च ॥ ४१ ॥ ॐ नमः पार्य्याय चावार्य्याय च नमः प्रतरणाय चोत्तरणाय च नमस्तीर्थ्याय च कुल्याय च नमः शष्प्याय च फेन्याय च ॥ ४२ ॥ ॐ नमः सिकत्याय च प्रवाह्याय च नमः किꣳशिलाय च क्षयणाय च नमः कपर्द्दिने च पुलस्तये च नमः ऽइरिण्याय च प्रपत्थ्याय च ॥ ४३ ॥ ॐ नमो व्रज्याय च गोष्ठ्याय च नमस्तल्प्याय च गेह्याय च नमो हृदय्याय च निवेप्याय च नमः काट्याय च गह्वरेष्ठाय च ॥ ४४ ॥ ॐ नमः शुष्क्याय च हरित्याय च नमः पाꣳसव्याय च रजस्याय च नमो लोप्याय चोल्लप्याय च नमः ऽऊर्य्याय च सूर्य्याय च ॥ ४५ ॥ ॐ नमः पर्ण्याय च पर्ण्यशदाय च नम ऽउद्गुरमाणाय चाभिघ्नते च नम ऽआखिदते च प्रखिदते च नम ऽइषु-कृद्भ्यो धनुष्कृद्भ्यश्च वो नमः। नमो वः किरिकेब्भ्यो देवानाꣳ हृदयेब्भ्यो नमो व्विचिन्वत्केब्भ्यो नमो व्विक्षिणत्केब्भ्यो नम ऽआनिर्हतेब्भ्यः ॥ ४६ ॥ ॐ द्रापे ऽअन्धसस्पते दरिद्रं नीललोहित। आसाम्प्रजानामेषाम्पशूनाम्मा भेर्म्मा रोङ्मो च नः किञ्च नाममत् ॥ ४७ ॥ ॐ इमा रुद्राय

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

तवसे कपर्द्दिने क्षयद्वीराय प्रभरामहे मतीः । यथा शमसद्द्विपदे चतुष्पदे विश्वम्पुष्टं ग्रामे ऽअस्मिन्ननातुरम् ॥ ४८ ॥ ॐ या ते रुद्र शिवा तनूः शिवा विश्वाहा भेषजी । शिवा रुद्रस्य भेषजी तया नो मृड जीवसे ॥ ४९ ॥ ॐ परि नो रुद्रस्य हेतिर्वृणक्तु परि त्वेषस्य दुर्मतिरघायोः । अव स्थिरा मघवद्यन्तनुष्व मीढ्वस्तोकाय तनयाय मृड ॥ ५० ॥ ॐ मीढुष्टम शिवतम शिवो नः सुमना भव । परमे वृक्ष ऽआयुधन्निधाय कृत्तिं वसान ऽआचर पिनाकम्बिभ्रदागहि ॥ ५१ ॥ विकिरिद्र विलोहित नमस्ते ऽअस्तु भगवः । यास्ते सहस्रꣳ हेतयोऽन्यमस्मन्निवपन्तु ताः ॥ ५२ ॥ ॐ सहस्राणि सहस्रशो बाह्वोस्तव हेतयः । तासामीशानो भगवः पराचीना मुखा कृधि ॥ ५३ ॥ ॐ असङ्ख्याता सहस्राणि ये रुद्रा ऽअधि भूम्याम् । तेषाꣳ सहस्रयोजनेऽव धन्वानि तन्मसि ॥ ५४ ॥ ॐ अस्मिन्महत्यर्णवेऽन्तरिक्षे भवा ऽअधि । तेषाꣳ सह० ॥ ५५ ॥ ॐ नीलग्रीवाः शितिकण्ठा दिवꣳ रुद्रा ऽउपश्रिताः । तेषाꣳ सहस्र० ॥ ५६ ॥ ॐ नीलग्रीवाः शितिकण्ठाः शर्व्वा ऽअधः क्षमाचराः । तेषाꣳ सहस्र० ॥ ५७ ॥ ॐ ये वृक्षेषु शष्पिञ्जरा नीलग्रीवा विलोहिताः । तेषाꣳ सहस्र० ॥ ५८ ॥ ॐ ये भूतानामधिपतयो विशिखासः कपर्द्दिनः ।

Kirtikant Sharma Collection, Najafgarh
CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

तेषाꣳ सहस्रयो० ॥ ५९ ॥ ॐ ये पथाम्पथि रक्षय ऽऐलबृदा ऽआयुर्युधः । तेषाꣳ सहस्र० ॥ ६० ॥ ॐ ये तीर्थानि प्रचरन्ति सृकाहस्ता निषङ्गिणः । तेषाꣳ सहस्रयो० ॥ ६१ ॥ ॐ येऽन्नेषु व्विविध्यन्ति पात्रेषु पिबतो जनान् । तेषाꣳ सहस्र० ॥ ६२ ॥ ॐ य ऽएतावन्तश्च भूयाꣳ सश्च दिशो रुद्द्रा वितस्थिरे । तेषाꣳ सहस्रयोजनेऽव धन्वानि तन्मसि ॥ ६३ ॥ ॐ नमोऽस्तु रुद्द्रेऽभ्यो ये दिवि येषां व्वर्षमिषवः । तेब्भ्यो दश प्राचीर्दश दक्षिणा दश प्रतीचीर्दशोदीचीर्दशोर्ध्वाः । तेब्भ्यो नमो ऽअस्तु ते नोऽवन्तु ते नो मृडयन्तु ते यन्द्विष्मो यश्च नो द्वेष्टि तमेषाञ्जम्भे दध्मः ॥ ६४ ॥ ॐ नमोऽस्तु रुद्रेब्भ्यो येऽन्तरिक्षे येषां व्वात ऽइषवः । तेभ्यो दश प्राचीर्दश दक्षिणा दश प्रतीचीर्दशोदीचीर्दशोर्ध्वाः । तेभ्यो नमो ऽअस्तु ते नोऽवन्तु ते नो मृडयन्तु ते यन्द्विष्मो यश्च नो द्वेष्टि तमेषाञ्जम्भे दध्मः ॥ ६५ ॥ ॐ नमोऽस्तु रुद्रेभ्यो ये पृथिव्व्यां य्येषामन्नमिषवः । तेभ्यी दश प्राचीर्दश दक्षिणा दश प्रतीचीर्दशोदीचीर्दशोर्ध्वाः ॥ तेभ्यो नमा ऽअस्तु ते नोऽवन्तु ते नो मृडयन्तु ते यन्द्विष्मो यश्च नो द्वेष्टि तमेषाञ्जम्भे दध्मः ॥ ६६ ॥ इति रुद्राध्यायं जपेत् । ततो मण्डपनैर्ऋत्यपश्चिमयोर्मध्ये वेद्युपरि तृणमण्डपं

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

उसके बाद प्रेतमातृ की वेदी पर तृण का मण्डप बनावे। उस वेदी पर सात प्रेतमातृ कपास सिन्दूर में रंगकर सात जगह रखे और आठ धातु से मिला हुआ लोहा सातो जगह में रखे। क्रम से संकल्प पढ़कर सात प्रेतमातृ के नामोंसे आवाहन करे।

कारयेत्। तत्र सप्तप्रेतमातृः स्थापयेत्। तद्यथा। सिन्दूराक्तकार्पासबीजेन प्रेतमातृः निरूप्य अष्टधातुमिलितलोहं च सप्तसु स्थानेषु संस्थाप्य क्रमेण पूजयेत्। अद्याऽशौचान्तद्वितीयेऽह्नि अमुकगोत्रस्य पितुरमुकप्रेतस्य विमुक्तिकाङ्क्षी स्वर्गाद्युत्तमलोकप्राप्तिकामः सप्तप्रेतमातृणां पूजनमहं करिष्ये। इति सङ्कल्पः। ॐ कराल्यै नमः करालीमा० ॥ १ ॥ ॐ भीषणायै नमः भीषणामा० ॥ २ ॥ ॐ रौद्रायै नमः रौद्रामा० ॥ ३ ॥ ॐ यमदंष्ट्रायै नमः यमदंष्ट्रामा० ॥ ४ ॥ ॐ कृशोदर्य्यै नमः कृशोदरीमा० ॥ ५ ॥ ॐ उग्रचण्डायै नमः उग्रचण्डामा० ॥ ६ ॥ ॐ महाकाल्यै नमः, महाकालीमा० ॥ ७ ॥ इति गन्धाक्षतपुष्पमाषान्नस्य सप्तवटकनैवेद्याचमनीय-ताम्बूलानि प्रत्येकं समर्पयेत्। एतत्पूजनसाङ्गतासिद्धयर्थं लोहदक्षिणां ब्राह्मणाय दातुमहमुत्सृजे। तत्समीपे सप्तकलशान् स्थापयेत्। तेषु कलशेषु ॐ शन्नो देवीरभिष्टय ऽआपो भवन्तु पीतये।

फूल चन्दन अक्षत से पूजन करे। उरदी का ७ बरे का नैवेद्य लगावे, आचमन करावे, पान सोपड़ी सबको चढ़ावे और पूजनकी पूर्ति के वास्ते लोहा दक्षिणा संकल्प करके ब्राह्मण को दे।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

उस वेदी के समीप ७ कलश स्थापन करे। उन कलशों में 'ॐ शन्नो देवा०' इस इस मन्त्र से जल डाले, 'ॐ यवोऽसि०' इस शँय्योरभिस्रवन्तु नः ॥ इति जलं क्षिपेत्। ॐ यवोऽसि यवयास्मद्द्वेषो यवयारातीः। इति यवान् क्षिपेत्। ॐ तिलोऽसि सोमदैवत्यो गोसवो देवनिर्मितः। प्रत्नमद्भिः प्रक्तः स्वधया पितॄँल्लोकान्प्रीणाहि नः स्वाहा। इति तिलान् क्षिपेत्। ॐ पवित्रेस्थो वैष्णव्यौ सवितुर्वः प्रसव ऽउत्पुनाम्यच्छिद्रेण पवित्रेण सूर्यस्य रश्मिभिः। तस्य ते पवित्रिपते पवित्रपूतस्य यत्कामः पुने तच्छकेयम् ॥ इति कुशान् क्षिपेत्। 'ॐ देवस्य त्वे'ति तज्जलं शिरस्यभिषिञ्च्य। तत्र मन्त्रः। ॐ देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्याम्पूष्णो हस्ताभ्याम्। सरस्वत्यै वाचो यन्तुर्यन्त्रिये दधामि बृहस्पतेष्ट्वा साम्राज्ज्येनाभिषिञ्चाम्यसौ ॥ १ ॥ ॐ देवस्य त्वा०। सरस्वत्यै वाचो यन्तुर्यन्त्रेणाऽग्नेः साम्राज्येनाभिषिञ्चामि ॥ २ ॥ ॐ देवस्य त्वा०। अश्विनोर्भैषज्येन तेजसे ब्रह्मवर्चसायाभिषिञ्चामि। सरस्वत्यै भैषज्येन वीर्य्यायान्नाद्यायाभिषिञ्चामीन्द्रस्येन्द्रियेण बलाय श्रियै यशसे ऽभिषिञ्चामि ॥३॥ ततः सव्येन पूर्वाभिमुखः पुरुषसूक्तं रुद्राध्यायं ॐ यद्देवा देवहेडनं देवासश्च कृमा वयम्। अग्निर्म्मा तस्मादेनसो विश्वान्मुञ्चत्वꣳ हसः ॥ १ ॥ ॐ यदि दिवा यदि नक्तमेनाꣳसि च

मन्त्र से यव डाले, 'ॐ तिलोऽसि०' इस मन्त्र से तिल डाले, 'ॐ पवित्रे स्थो०' इस मन्त्र से कुशा डाले, 'ॐ देवस्य त्वा०' इस

Kirtikant Sharma Collection, Najafgarh
CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

३ मन्त्र से सातों कलश का जल यजमान अपने शिर पर छिड़के। उसके बाद सव्य होकर पूरव मुँह 'सहस्रशीर्षा १६ मन्त्र', कृमा व्वयम्। व्वायुर्मा तस्मादेनसो व्विश्वान्मुञ्चत्वꣳ हसः ॥ २ ॥ ॐ यदि जाग्रद्यदि स्वप्न ऽएनाꣳसि च कृमा व्वयम्। सूर्यो मा तस्मादेनसो विश्वान्मुञ्चत्वꣳ हसः ॥ ३ ॥ इति पठेत्। ततोऽपसव्येन कुशत्रययवजलान्यादाय। अद्याशौचान्तद्वितीयेऽह्नि अमुकगोत्रस्य पितुरमुकप्रेतस्य प्रेतत्वविमुक्तिकाङ्क्षी स्वर्गाद्युत्तमलोकप्राप्तिकामः वत्सतरीचतुष्टयसहित-वृषोत्सर्गयज्ञे ब्राह्मणद्वारा हवनमहं करिष्ये। तत उत्तराभिमुखं ब्राह्मणमुपवेश्य वरणद्रव्यञ्चादाय। अद्यामुकगोत्रस्य पितुरमुकप्रेतस्य कर्त्तव्यवृषोत्सर्गाङ्गभूतहोकर्मणि कृताऽकृतावेक्षणरूपब्रह्मकर्म कर्तुममुकगोत्रममुकशर्माणं ब्राह्मणमेभिः पुष्प-चन्दन-ताम्बूल-वस्त्र-युग्महेमालङ्कारयुक्तैर्ब्रह्मत्वेन त्वामहं वृणे, ब्रह्माणं वृणुयात्। वृतोऽस्मीति प्रतिवचनम्। पुनः वरणद्रव्यञ्चादाय। अद्याऽशौचान्तद्वितीयेऽह्नि अमुकगोत्रस्य पितुरमुकप्रेतस्य कर्त्तव्यवृषोत्सर्गाङ्गभूतहोमकर्म कर्तुम् अमुकशर्माणं ब्राह्मणमेभिः पुष्प-चन्दन-ताम्बूल-वस्त्र-युग्महेमालङ्कर-युक्तैर्होतृत्वेन त्वामहं वृणे। वृतोऽस्मीति प्रतिवचनम्। यथा तथा 'नमस्ते ६६ मन्त्र' और 'यद्देवादेवहेडनम्' यह ३ मन्त्र पढ़े, अपसव्य होकर तीन कुशा, यव, जल लेकर होम का संकल्प करे और ब्राह्मण को संकल्प करके २ वरणी दे। ब्राह्मण 'वृतोऽस्मि' कहे, यजमान कहे—'जैसा कर्म लिखा है उस विधि से आप करें।

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

Vartikant Sharma Collection, Najafgarh

ब्राह्मण कहे—'जैसा ज्ञान है वैसा करेंगे।' उसके बाद होता पूर्व मुँह बैठकर आचमन करे और तीन कुशा लेकर होम की वेदी को झाड़े, उस कुशा को ईशानमें फेंके। गोबर जल लेकर वेदीको लीपे। वेदी के मध्य में स्रुवा के जड़ से १० अंगुल की तीन-तीन रेखा करे। उत्तर-उत्तर क्रम से जिस प्रकार से रेखा की गयी है उसी प्रकार से अनामिका तथा अँगूठा से रेखा पर की

Kirtikant Sharma Collection, Najafgarh

त्रिहितं कर्म कुरु। यथा ज्ञानं करवाणीति। ततो होता प्राङ्मुख उपविश्याऽऽचान्तः कुशैर्हस्तमात्रं चतुरस्रं स्थण्डिलं परिसमूह्य तान् कुशानैशान्यां परित्यज्य गोमयोदकेनोपलिप्य मध्ये प्र देशमात्रा-मुत्तरोत्तरक्रमेण स्रुवमूलेन त्रिरुल्लिख्य उल्लेखनक्रमेणाऽनामिकाङ्गुष्ठाभ्यां मृदमुद्धृत्य ऐशान्यां तां क्षिप्त्वा तं देशं जलेनाऽभ्युक्ष्य तत्र दक्षिणहस्तस्थकांस्यपात्रेणाऽग्निमानीय तूष्णीं स्थापयेत्। अग्नेर्दक्षिणतो ब्रह्माऽऽसनम्। अग्नेरुत्तरतः प्रणीतासनद्वयं ब्रह्माऽऽसने ब्रह्मोपवेशनम्। प्रणीतापात्रं पुरतः कृत्वा वारिणा परिपूर्य कुशैराच्छाद्य प्रथमासने निधाय ब्रह्मणो मुखमवलोक्य द्वितीयासने

मिट्टी उठाकर ईशान में फेंके। उन रेखाओं पर जल छिड़के, दाहिने हाथसे काँसे की थालीमें अग्नि लेकर वेदीपर स्थापन करे, बाद कुशकंडिका करे। उसका क्रम यह है—अग्नि के दक्षिण तरफ ३ कुशा ब्रह्मा के वास्ते आसन रखे, अग्निके उत्तर तरफ दो-दो कुशाका आसन रखे, ब्रह्माके आसन पर ब्रह्माको बैठावे। प्रणीतापात्रको अपने आगे रखे, उसको जलसे भरे, कुशाओंसे ढँक अग्नि के उत्तर तरफ जो दो आसन है उस आसनके पहिले आसन पर प्रणीता रखे। इसके बाद ब्रह्मा के तरफ देखकर दूसरे आसन पर

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

रखे, उसके बाद मुट्ठी भर कुशा लेवे [अथवा ८१ कुशा] उसमेंसे ४ भाग करे, १भाग वेदीके अग्निकोण से ईशान तक, पूर्व और १भाग ब्रह्मासे अग्नि तक दक्षिण और १ भाग नैर्ऋत्य से वायव्य तक पश्चिम और १ भाग अग्नि से प्रणीता तक उत्तर में, इस तरह कुशा बिछावे। अब कार्य में आनेवाले पात्रका आसादन करते हैं—अग्निके उत्तर-पश्चिमसे पवित्री काटने के वास्ते ३ कुशा

निदध्यात्। ततो बर्हिषश्चतुर्थभागमादाय आग्नेयादीशानान्तं प्राच्याम्। ब्रह्मणोऽग्निपर्यन्तं दक्षिणस्याम्। नैर्ऋत्याद्वायव्यान्तं प्रतीच्याम्। अग्नितः प्रणीतापर्यन्तम् उत्तरस्याम्। इति परिस्तरणम्। तत्र पात्रासादनमुपयोक्ष्यमाणानामग्नेरुत्तरतः। पवित्रच्छेदनार्थं कुशत्रयं पवित्रार्थमनन्तर्गर्भितं साग्रकुशपत्रद्वयं प्रोक्षण्यर्थं मृत्पात्रम् आज्यार्थं ताम्रस्थाली। पायसचरु-पिष्टचर्वर्थश्च सान्तराल-मृत्तिकास्थाली। स्रुवसम्मार्जनार्थं कुशत्रयम्। उपग्रहार्थं वेणीरूपं कुशत्रयं प्रादेशमात्रम्। पालाश-समित्त्रयम्। स्रुवः। आज्यम्। तन्दुलपिष्टम्। तन्दुलान्। जलम्। दुग्धम्। ब्रह्मदक्षिणार्थं पूर्णपात्रं, होतृदक्षिणार्थं वस्त्रयुग्मसुवर्णकांस्यान्युपकल्पयेत्। ततो वाग्यत आसादितकुश-

पवित्रीके लिये, कुशाका दो पत्ता बीचका गर्भ निकालकर और अग्रके सहित रखे, प्रोक्षणी के लिए मिट्टीकी ढकनी रखे, घी के लिये ताँबेका कटोरा रखे, पायसचरु पिष्टचरुके लिये, दो खानावाली मिट्टीकी कड़ाही, स्रुवाको पोंछनेके लिये ३ कुशा, हाथमें लेने के लिये वेणी रूप ३कुशा, १०अंगुलकी पलाशकी लकड़ी ३, दस-दस अंगुलकी स्रुवा,घी, चावलका आटा, चावल जल दूध ब्रह्माकी

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2
Harikant Sharma Collection, Najafgarh

दक्षिणाके लिये चावलसे पूर्णभरा पात्र रखे, होताकी दक्षिणाके वास्ते २वस्त्र, सोना, कांसा रखे। एक के आगे एक क्रमसे रखे। सब चीजें अब चुपचाप रखा हुआ, २कुशा पत्ता और ३ कुशा जो पवित्री काटने वाला है उसे उठावे, १० अंगुल पवित्री को नापके तीन कुशासे बाकीको काट देवे, उस पवित्रीको लेकर प्रणीताका जल तीन दफे प्रोक्षणीमें रखे, दोनों हाथकी अनामिका

पत्रद्वयमादाय पवित्रच्छेदनकुशौ. प्रादेशमात्रं प्रमाप्य छिन्द्यात्। तानपास्य सपवित्रकरेण प्रणीतोदकेन त्रिः प्रोक्षणीपात्रं निधाय पवित्राभ्यामुत्पूय प्रोक्षण्या सव्यहस्तकरणं त्रिरुद्धिङ्गनम्। प्रणीतोदकेन प्रोक्षणीप्रोक्षणम्। प्रोक्षणीजलेनासादितवस्तुसेचनम्। पवित्रशेषजलसहितप्रोक्षणीपात्रं प्रणीताग्न्योर्मध्ये निधाय। आज्यस्थाल्यामाज्यनिर्वापः। सान्तराल-मृण्मयपात्रे प्रणीताजलम् एकस्मिन् स्थाने। एकस्मिन्स्थाने क्षीरं पिष्टमयचरुजलमध्ये क्षिपेत्। ततो ब्रह्मादक्षिणतः आज्यमधिश्रयेत्, तस्योत्तरतः स्वयं चरुं श्रपयेत्। उल्मुकं स-हविष्याग्नेः प्रदक्षिणं भ्रामयित्वा तत्रैव क्षिप्त्वा ततः

और अँगूठासे पवित्री को थामकर प्रोक्षणी के जलको उत्पवन करे। प्रोक्षणी को बाँये हाथ पर रखे। दाहिने हाथ से पवित्री लेकर प्रोक्षणीके जलको तीन वार उछाले। प्रणीता के जलसे प्रोक्षणी को प्रोक्षण करे। प्रोक्षणी के जलसे जितनी वस्तु रखी है उसको प्रोक्षण करे। पवित्रीके सहित प्रोक्षणीको अग्नि-प्रणीता के बीचमें रखे। होमके कटोरा में घी रखे और दो-खाना वाली मिट्टी की कड़ाही में १ तरफ प्रणीताजल, १ तरफ दूध डाले। जल में चावल का आटा और दूध में प्रणीता के जल से

Amritkant Sharma Collection, Najafgarh
CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

धोकर चावल डाले। ब्रह्मा अग्नि पर दक्षिण तरफ घी रखे और होता घी के उत्तर तरफ चरु रखे। जलती हुई लकड़ी उठा कर प्रदक्षिण क्रम से दोनों हवि के ऊपर घुमाकर अग्नि में छोड़ दे. बाद स्रुवा को नीचे की ओर मुँह करके तपावे। संमार्जन कुशा को लेकर कुशा के अग्र से स्रुवा के अग्र से मूल तक, कुशा के मूल से स्रुवा के मूल तथा अग्र तक पोंछे। प्रणीता के जल से प्रोक्षण

अधोमुखं स्रुवप्रतपनं सम्मार्गकुशानामग्नेरन्तरतो मूलैर्बाह्यतः स्रुवं सम्मार्ज्य प्रणीतोदकेऽभ्युक्ष्य पुनः प्रतप्य दक्षिणदेशे निधाय। आज्योद्वासनं चरुं पूर्वेणाऽऽनीय अग्निपश्चिमे निधाय, पायसचरुमुद्वास्याऽऽज्यपश्चिमेन नीत्वा आज्यस्योत्तरतो निधाय। प्रोक्षणीतः पवित्रे समानीय आज्योत्पवनम्। आज्यावेक्षणम्। सत्यपद्रव्ये तन्निरसनम्। पुनः प्रोक्षण्युत्पवनम्। उपयमनकुशान् वामहस्ते कृत्वा प्रजापतिं मनसा ध्यात्वा तिष्ठन् प्राग्गृहीताक्तसमित्त्रयं ब्रह्मौ क्षिपेत्। उपविश्य सपवित्रकरेण प्रोक्षण्युदकेन ईशानादारभ्य ईशानपर्यन्तमग्निं पर्युक्ष्य पवित्रे प्रणीतापात्रे निधाय, ततो

स्रुवा को करे। फिर तपाकर दक्षिण तरफ रखे, घी को अग्नि पर से चरु के पूरव से उतार कर ले आवे। अग्नि के पश्चिम तरफ रखे। पायस चरु उतार कर घी के पश्चिम से ले आवे, घी के उत्तर तरफ रखे, प्रोक्षणी में से पवित्री लेकर घी को प्रोक्षणी की तरह उत्पवन करे और घीमें देखे कोई खराब चीज हो तो निकाल दे। फिर उसी पवित्रा से प्रोक्षणी को उत्पवन करे, उपयमन जो वेणीरूप कुशा है उसको बायें हाथ में लेकर दाहिने हाथ से ३ पलासवाली समिधा [लकड़ी] लेकर खड़ा हो ब्रह्मा को मन में

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

ध्यान करके पूरव को अग्र रहे ऐसा घी में डुबोकर तीनों लकड़ी अग्नि में डाल दे। बैठकर पवित्रा के सहित प्रोक्षणी का जल ईशान से लेकर ईशान तक घुमावे, पवित्रा में प्रणीता रखे, बाद होता को ब्रह्मा कुशा से छूते रहे, होता दाहिना पैर मोड़कर आगे लिखे हुये ब्रह्मणा कुशेनाऽन्वारब्धो दक्षिणजानुं पातयित्वा। ॐ इह रतिः स्वाहा। इदमग्नये न मम ॥ १ ॥ अग्निमध्ये त्यागः, न तु प्रोक्षणीपात्रे। ॐ इह रमध्वꣳ स्वाहा। इदमग्नये न मम ॥ २ ॥ ॐ इह धृतिः स्वाहा। इदमग्नये न मम ॥ ३ ॥ ॐ इह स्वधृतिः स्वाहा। इदमग्नये न मम ॥ ४ ॥ ॐ उपसृजं धरुणं मातरं मात्रधरुणो मातरं धयन् स्वाहा। इदमग्नये न मम ॥ ५ ॥ ॐ रायस्पोषमस्मासु दीधरत्। स्वाहा। इदमग्नये न मम ॥ ६ ॥ केषाञ्चिन्मते ॐकारसहितः षडाज्याहुतीः कुर्यात्। संस्रवं प्रोक्षणीपात्रे प्रक्षेपः। ततः आघारावाज्यभागं पायसहोमं तु ॐकारसहितः कुर्यात्। ब्रह्मणान्वारब्ध। ॐ प्रजापतये स्वाहा, इदं प्रजापतये न मम। ॐ इन्द्राय स्वाहा, इदमिन्द्राय न मम। ॐ अग्नये स्वाहा, इदमग्नये न मम। ॐ सोमाय स्वाहा इदं सोमाय न मम। तत अनन्वारब्धः पायसहोमः। ॐ अग्नये स्वाहा, इदमग्नये न मम ॥ १ ॥ ॐ रुद्राय स्वाहा, इदं रुद्राय०

ॐकार सहित मन्त्रों से ६ आहुति दे और आहुति देने के बाद स्रुवा का शेष प्रोक्षणी में डाले। किसी के मत से ॐकार सहित, किसी के मत से ॐकार रहित करे। ब्रह्मासे स्पर्श किये हुये 'प्रजापतये इन्द्राय अग्नये सोमाय' ४आहुति दे। ब्रह्मासे स्पर्श छोड़-

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

कर इन मन्त्रों से पायस होम देवे 'अग्नये रुद्राय शर्वाय पशुपतये' 'उग्राय उशनसे भवाय महादेवाय ईशानाय' अव पिष्ट चरु का ॥ २ ॥ ॐ शर्वाय स्वाहा, इदं शर्वाय न० ॥ ३ ॥ ॐ पशुपतये स्वाहा, इदं पशुपतये० ॥ ४ ॥ ॐ उग्राय स्वाहा, इदमुग्राय० ॥ ५ ॥ ॐ उशनसे स्वाहा, इदमुशनसे० ॥ ६ ॥ ॐ भवाय स्वाहा, इदं भवाय० ॥ ७ ॥ ॐ महादेवाय स्वाहा, इदं महादेवाय० ॥ ८ ॥ ॐ ईशानाय स्वाहा, इदमीशानाय० ॥ ९ ॥ अथ पिष्टकेन। ॐ पूषा गा ऽअन्वेतु नः पूषा रक्षत्ववर्वतः। पूषा वाजꣳसनोतु नः स्वाहा, इदं पूष्णे न मम ॥ १० ॥ ततोऽन्वारब्धेन। ततः पायसपिष्टकाभ्यामुत्तरार्द्धावदानभूताभ्याम्। ॐ अग्नये स्विष्टकृते स्वाहा, इदमग्नये स्विष्टकृते न मम। तत आज्येन। ॐ स्वाहा, इदमग्नये०। ॐ भुवः स्वाहा, इदं वायवे०। ॐ स्वः स्वाहा, इदं सूर्याय०। ॐ त्वन्नऽअग्ने वरुणस्य विद्वान्देवस्य हेडोऽअवयासिसीष्ठाः। यजिष्ठो वह्नितमः शोशुचानो विश्वा द्वेषाꣳसि प्रमुमुग्ध्यस्मत्स्वाहा। इमग्नीवरुणाभ्यां न मम। ॐ स त्वन्नो ऽअग्ने वमो भवोती नेदिष्टो ऽस्या ऽउषसी व्युष्टौ। अव यक्ष्व न वरुणꣳ रराणो व्वीहि मृडीकꣳ सुहवो न ऽएधि

होम 'ॐ पूषा गा अन्वेतु नः' इस मन्त्र से करे। बाद ब्रह्मा से स्पर्श करके घी पायस पिष्ट चरु शेष इकट्ठा सब लेकर 'अग्नये स्विष्टकृते' से स्विष्टकृत् आहुति दे, और घी की नव आहुति 'ॐ भू' इत्यादि मन्त्रों से दे। शेष प्रोक्षणी में डाले प्रोक्षणी का

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2
Kirtikant Sharma Collection, Najafgarh

घी प्राशन करे, या सूँघे, आचमन करे, पवित्रा से प्रणीता का जल अपने ऊपर छिड़के 'सुमित्रिया न' इस मन्त्र से 'दुर्मित्रिया' स्वाहा। इदमग्नीवरुणाभ्यां न मम। ॐ अयाश्चाग्नेस्यनभिशस्तिपाश्च सत्यमित्त्वमया ऽअसि। अयानो यज्ञं वहास्ययानो धेहि भेषजꣳ स्वाहा। इदमग्नये अयसे०। ॐ ये ते शतं व्वरुणं ये सहस्रं यज्ञियाः पाशा व्विवतता महान्तः। तेभिर्नो ऽअद्य सवितोत विष्णुर्विश्वे मुञ्चन्तु मरुतः स्वर्कार्काः स्वाहा। इदं वरुणाय सवित्रे विष्णवे विश्वेभ्यो देवेभ्यो मरुद्भ्यः स्वर्केभ्यश्च न मम। ॐ उदुत्तमं वरुणं पाशमस्मद्वाधमं वि मध्यमꣳ श्रथाय। अथो व्वयमादित्यव्रते तवानागसो ऽअदितये स्याम स्वाहा। इदं वरुणायादित्यायाऽदितये न मम। ॐ प्रजापतये स्वाहा, इदं प्रजापतये न मम। इति मनसा। संस्रवप्राशनम्। आचमनम्। पवित्राभ्यां मार्जनम्। ॐ सुमित्रिया न ऽआप ऽओषधयः सन्तु। ॐ दुर्मित्रियास्तस्मै सन्तु योऽस्मान्द्वेष्टि यञ्च वयन्द्विष्मः, इति ऐशान्यां प्रणीतां न्युब्जीकुर्यात्। कृतस्य वृषोत्सर्गाङ्गहवनकर्मणः कृता-ऽकृतावेक्षणरूपब्रह्मकर्मप्रतिष्ठार्थम् इदं पूर्णपात्रं प्रजापतिदैवतममुकगोत्रायाऽमुकशर्मणे ब्राह्मणाय दक्षिणां ब्रह्मणे तुभ्यमहं सम्प्रददे। ॐ स्वस्तीति प्रतिवचनम्। केषाञ्चिन्मते पूर्णाहुतिं इस मन्त्र से प्रणीता को ईशान में उलट दे। फिर हाथ में जल तथा पूर्णपात्र लेकर दक्षिणा के सहित संकल्प पढ़कर ब्रह्मा को दे,

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

ब्रह्मा 'स्वस्ति' कहें। किसी का मत पूर्णाहुति करने का है, किसी का नहीं है.। यदि पूर्णाहुति करना हो तो 'मूर्धानं' इस मन्त्र से दे और वेदी के चारों तरफ का कुशा उठाकर घी में डुबोकर 'देवागातु' इस मन्त्र से अग्नि में डाल दे। कुर्यात्। तत्र मन्त्रः। ॐ मूर्द्धानन्दिवो ऽरतिं पृथिव्या वैश्वानरमृत ऽआजातमग्निम्। कविꣳ साम्राजमतिथिञ्जनानामासन्नापात्रञ्जनयन्त देवाः स्वाहा॥ इदमग्नये०। तत आस्तरण-क्रमेण बर्हिरुत्थाप्य आज्येनाभिघार्य्य हस्तेनैव जुहुयात्। ॐ देवा गातु त्रिदो गातुं त्रिवत्वा गातुमित। मनसस्पत ऽइमं देवयज्ञꣳ स्वाहा, वातेधाः स्वाहा, इदमग्नये०। इति बर्हिहोमः। कुशत्रय-तिल-जलान्यादाय वस्त्रयुग्मसुवर्णकांस्यपात्राणि चादाय। अद्य कर्त्तव्यवृषोत्सर्गाङ्गभूत-कृतैतद्धोमप्रतिष्ठार्थम् एतानि वस्त्रयुग्मसुवर्णकांस्यानि बृहस्पतिवह्निचन्द्रदैवतानि अमुकगोत्रायाऽमुक-शर्मणे ब्राह्मणाय होत्रे दक्षिणां तुभ्यमहं संप्रददे। ॐ स्वस्तीति प्रतिवचनम्। ततो रुद्राध्यायं जपेत्। लोहकारमाहूय वृषभं लाञ्छयेत्। ॐ इमा रुद्राय तवसे कपर्द्दिने क्षयद्वीराय प्रभरामहे मतीः। यथा शमसद्द्विपदे चतुष्पदे विश्वम्पुष्टं ग्रामे ऽअस्मिन्ननातुरम्॥ इति मन्त्रेण दक्षिण-

इसको बर्हिहोम कहते हैं। तीन कुशा, तिल, जल, दो वस्त्र सोना, कांसा लेकर संकल्प पढ़ कर होता को दक्षिणा दे, होता 'ॐ स्वस्ति' कहे। उसके बाद 'नमस्ते' इत्यादि ६६ मन्त्र पढ़कर वृषभ दागने वाले को बुलाकर वृषभ को त्रिशूल तथा चक्र का

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

चिह्न करावे, 'ॐ इमा रुद्राय' इस मन्त्र से दाहिने तरफ १२ अंगुल त्रिशूल 'ॐ नमस्ते रुद्र' १ मन्त्र से आठ अंगुल का बायें तरफ पार्श्वे द्वादशाङ्गुलेन त्रिशूलं लिखेत्। ॐ नमस्ते रुद्र मन्यव ऽउतो त ऽइषवे नमः, बाहुभ्यामुत ते नमः। इति वामपार्श्वे अष्टाङ्गुलं चक्रं लिखेत्। दधिगोमयोर्मध्ये स्नापयित्वाऽङ्कितम्। नः। ततो वत्सतरीचतुष्टयसहितं वृषभं कुशजलेन स्नापयेत्। तत्र स्नानकरणमन्त्राः। ॐ हिरण्यवर्णाः शुचयः पावकायासु जातः कश्यपो यस्त्विन्द्रः। या ऽअग्निं गर्भं दधिरे सुवर्णास्ता न ऽआपः शꣳ स्योना भवन्तु॥ ॐ यासाꣳ राजा वरुणो याति मध्ये सत्यानृते अवपश्यञ्जनानाम्। या ऽअग्निं गर्भं दधिरे सुवर्णास्ता न आपः शꣳ स्योन भवन्तु॥ ॐ यासां देवा दिवि कृण्वन्तु भक्षं या ऽअन्तरिक्षे बहुधा भवन्ति। या अग्निं गर्भं दधिरे सुवर्णास्ता न आपः शꣳ स्योना भवन्तु॥ ॐ शिवेन मा चक्षुषा पश्यतापः शिवया तन्वोपस्पृश तत्वचं मे। घृतश्च्युतः शुचयो याः पावकास्ता न ऽआपः शꣳ स्योना भवन्तु॥ ॐ शन्नो देवीरभिष्टय ऽआपो भवन्तु पीतये। शं य्योरभिस्त्रवन्तु नः॥ इति मार्जनम्। ततो लोहघण्टिकानूपुरकनककपर्दिकादिभिः

चक्र लिखे। दधि, गोवर मिलाकर नहलावे, फिर उसको अंकित करे। उसके बाद चारों बछिया के सङ्ग वृषभ को कुश जल से स्नान करावे, स्नान का मन्त्र मूल में देखना। उसके बाद पाँचों को लोह घण्टी पैजेब इत्यादि से अलंकृत कर, अघमर्षण रुद्रा-

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

ध्याय ६६ मन्त्रा, पुरुष सूक्त १६ मन्त्र, 'यद्देवा देवहेडनं' ३ मन्त्रा पढ़े। बाद बैल के दाहिने कान में 'ॐ पिता वत्सा' इस पञ्चाप्यलङ्कृत्य सावित्रीमघमर्षणं रुद्राध्यायं पुरुषसूक्तं ॐ यद्देवा देवेति च जपेत्। ॐ यद्देवा देवहेडनं देवासश्च कृमा वयम्। अग्निर्मा तस्मादेनसो विश्वान्मुञ्चत्वꣳ हसः॥ यदि दिवा यदि नक्तमेनाꣳसि च कृमा वयम्॥ वायुर्मा तस्मादेनसो विश्वान्मुञ्चत्वꣳ हसः॥ यदि जाग्रद्यदि स्वप्न ऽएनाꣳसि च कृमा वयम्॥ सूर्य्यो मा तस्मादेनसो विश्वान्मुञ्चत्वꣳ हसः॥ इति ऋक्त्रयं कूष्माण्डीश्च जपेत्। ततो वृषभस्य दक्षिणकर्णे जपेत्। ॐ पिता वत्सानां पतिरघ्नीयानामथो पितामहता गर्गराणां वत्सो जरायुः। प्रतिधुक् पीयूष ऽआमिक्षा घृतं तदुवस्यरेतः॥ वृषोऽसि भगवान् धर्मश्चतुष्पादः प्रकीर्तितः। वृणोमि त्वामहं भक्त्या स मां रक्षतु सर्वतः॥ सत्यं वृषस्वरूपेण गवामानन्दकारकः। अष्टमूर्तेरधिष्ठानमतः पाहि सनातन!॥ त्वयि मत्ते क्षयाल्लोकाः प्रेताः सन्तु निरामयाः॥ इति मन्त्रद्वयं जपित्वा। अथ न्यासः। ॐ त्र्यम्बकं यजामहे सुगन्धिं पुष्टिवर्द्धनम्। उर्व्वारुकमिव बन्धनान्मृत्योर्मुक्षीय मामृतात्॥ इति शिरसि। ॐ नमस्ते रुद्र मन्यव ऽउतोत ऽइषवे नमः बाहुभ्यामुत ते नमः॥ इति ललाटे। ॐ नमः शम्भवाय च मयो-

मन्त्राको कहे और 'वृषोऽसि भगवान्' इन श्लोकों को कहे। आगे 'त्र्यम्बकं' इत्यादि मन्त्रोंसे वृषभका न्यास करे, उसके बाद चारों

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2
Kirtikant Sharma Collection, Najafgarh

भवाय च नमः शङ्कराय च मयस्कराय च नमः शिवाय च शिवतराय च ॥ इति मुखे। ॐ प्राणाय स्वाहा ऽपानाय स्वाहा व्यानाय स्वाहा चक्षुषे स्वाहा श्रोत्राय स्वाहा वाचे स्वाहा मनसे स्वाहा ॥ इति नासिकायाम्। ॐ नीलग्रीवाः शितिकण्ठा दिवꣳ रुद्रा ऽउपश्रिताः। तेषाꣳ सहस्रयोजनेव धन्वानि तन्मसि। इति ग्रीवायाम्। ॐ यज्जाग्रतो दूरमुदैति दैवन्तदु सुप्तस्य तथैवेति। दुरङ्गमञ्ज्योतिषाञ्ज्योतिरेकन्तन्मे मनः शिवसंकल्पमस्तु। इति बाह्वोः। ॐ शिवो नामासि स्वधितिस्ते पिता नमस्ते ऽअस्तु मा मा हिꣳसीः। निवर्तयाम्यायुषेऽन्नाद्याय प्रजननाय रायस्पोषाय सुप्रजास्त्वाय सुवीर्य्याय ॥ इति लाङ्गूले। ॐ वृषाग्निं वृषणभरन्नपाङ्गर्भ्भꣳ समुद्रियम्। अग्न ऽआयाहि वीतये ॥ इति वृष्णे। ॐ त्र्यम्बकमिति पादेषु। इति न्यासः। ततो वत्सतरी-सहितं वृषभं पूजयेत्। तत्र क्रमः। वत्सतरीभ्यो नमः। धर्मरूपाय वृषाय नमः, इति पाद्या-र्घ्याचमनीयस्नानादिभिरुपचारैः सम्पूज्य कुशत्रयतिलजलान्यादाय। अद्याशौचान्तद्वितीयेऽह्नि अमुकगोत्रस्य पितरमुकप्रेतस्य मोक्षकामो रुद्रदैवत्यं वृषभमेनं युवानं पतिं वो ददानि तेन क्रीडन्त्यश्च रथप्रियेण। मा नः सप्त्यजनुषा सुभगा रायस्पोषेण समिषा मदेम ॥ इत्युत्सृजेत्। तत ऐशान्यां

बछिया के सहित वृषभ का पजन करके तीन कुशा तिल जल लेकर चारों बछिया के सहित वृषभ का सङ्कल्प करके त्याग करे और

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

ईशान दिशा के तरफ पाँचों को चलावे, फिर पाँचों का पूजन करे, उसके बाद चारों बछिया के मध्य में वृषभ को मूलमें

दिशि पञ्चापि चालयेत्। पुनः पञ्चापि पूजयेत्। ततो वत्सतरीचतुष्टयमध्यगतं वृषभमभिमन्त्र-
येत्। तत्र मन्त्राः। ॐ समुद्रोऽसि नभस्वानार्द्रदानुः शम्भूर्मयो भूरभि मा वाहि स्वाहा।
मारुतोऽसि मरुतां गणः शम्भूर्मयो भूरभि मा वाहि स्वाहा। वस्यूरसि दुवस्वाञ्छम्भूर्मयो भूरभि
मा व्वाहि स्वाहा। ॐ यास्ते ऽअग्ने सूर्ये रुचो दिवमातन्वन्ति रश्मिभिः। ताभिर्नो ऽअद्य
सर्वाभी रुचे जनाय नस्कृधि। या वो देवाः सूर्य्ये रुचो गोष्वश्वेषु या रुचः। इन्द्राग्नी ताभिः
सर्वाभी रुचन्नो धत्त बृहस्पते॥ रुचन्नो धेहि ब्राह्मणेषुस्वः राजसु नस्कृधि। रुचं विश्वेषु
शूद्रेषु मयि धेहि रुचारुचम् ॐ तत्त्वा यामि ब्रह्मणा वन्दमानस्तदाशास्ते यजमानो हविर्भिः।
अहेडमानो वरुणेह बोध्युरुशꣳ स मा न ऽआयुः प्रमोषीः। स्वर्णः घर्मः स्वाहा स्वर्णार्कः
स्वाहा स्वर्णशुक्रः स्वाहा स्वर्णज्योतिः स्वाहा स्वर्णसूर्य्यः स्वाहा। (अथ नीलश्राद्धम्)
ततोऽपसव्यम्। पितृपक्षाश्च ये केचिद्ये चाऽन्ये मातृपक्षकाः। गुरु-श्वशुर-बन्धूनां ये कुलेषु
समुद्भवाः॥ ते सर्वे तृप्तिं गच्छन्तु नीलपिण्डं ददाम्यहम्॥ १॥ ये चाऽन्ये लुप्तपिण्डाश्च पुत्र-

लिखे हुए मन्त्रों से अभिमन्त्रण करे। आगे अपसव्य होकर पितृपक्ष इत्यादि में लिखे हुए २९ श्लोकों से नील श्राद्ध

Kirtikant Sharma Collection, Najafgarh
CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

दारविवर्जिताः । ते सर्वे तृप्तिं गच्छन्तु नीलपिण्डं ददाम्यहम् ॥ २ ॥ आब्रह्मणो ये पितृवंशजाता मातुस्तथा वंशभवा मदीयाः । कुलद्वये ये मम वंशभूता भृत्यास्तथैवाश्रितसेवकाश्च ॥ ते सर्वे तृप्तिं गच्छन्तु नीलपिण्डं ददाम्यहम् ॥ ३ ॥ मित्राणि शिष्याः पशवश्च वृक्षाः दृष्टाश्च पृष्टाश्च कृतोपकाराः । देशान्तरे ये मम सङ्गताश्च तेभ्यः स्वधाकृत्य इदं ददामि ॥ ते सर्वे तृप्तिं गच्छन्तु नीलपिण्डं ददाम्यहम् ॥ ४ ॥ ये बान्धवाऽबान्धवा वा येऽन्यजन्मनि बान्धवाः । अकालेऽपगता ये च ये चाऽन्धाः पङ्गवस्तथा ॥ ते सर्वे तृप्तिं गच्छन्तु नीलपिण्डं ददाम्यहम् ॥ ५ ॥ विरूपा आमगर्भाश्च ज्ञाताऽज्ञातकुले मम । आमगर्भाश्च ये केचिदागता मुखगोचरे ॥ ते सर्वे तृप्तिं गच्छन्तु नीलपिण्डं ददाम्यहम् ॥ ६ ॥ वृषयोनिगता ये च कीटकादि पतङ्गकाः । ते सर्वे तृप्तिं गच्छन्तु नीलपिण्डं ददाम्यहम् ॥ ७ ॥ रौरवे नरके जाताः कुम्भीपाके च ये गताः । ते सर्वे तृप्तिं गच्छन्तु नीलपिण्डं ददाम्यहम् ॥ ८ ॥ तप्ततैले च क्षीयन्ते यमलोके महाभये । ते सर्वे तृप्तिं गच्छन्तु नीलपिण्डं ददाम्यहम् ॥ ९ ॥ पीड्यन्ते किङ्करैर्यै च सुदृढमिक्षुकाण्डवत् । ते सर्वे तृप्तिं गच्छन्तु नीलपिण्डं ददाम्यहम् ॥ १० ॥ जलेन पीडिताः पङ्के यमदूतैर्महाबलैः । ते सर्वे तृप्तिं गच्छन्तु

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

नीलपिण्डं ददाम्यहम् ॥ ११ ॥ यन्त्रमध्ये प्रपीड्यन्ते प्रेतपीडाव्यवस्थिताः । ते सर्वे तृप्तिं गच्छन्तु नीलपिण्डं ददाम्यहम् ॥ १२ ॥ कुष्ठा-ऽपस्मार-लूताभिर्जलोदर-भगन्दरैः । ते सर्वे तृप्तिं गच्छन्तु नीलपिण्डं ददाम्यहम् ॥ १३ ॥ गण्डमाला-पाण्डुरोगैः क्षयव्याधिमृताश्च ये । ते सर्वे तृप्तिं गच्छन्तु नीलपिण्डं ददाम्यहम् ॥ १४ ॥ कारागृहे मृता ये च व्याघ्रभीतिहतास्तथा । ते सर्वे तृप्तिं गच्छन्तु नीलपिण्डं ददाम्यहम् ॥ १५ ॥ चाण्डालैर्निहिता मार्गे आशौचशयने मृताः । ते सर्वे तृप्तिं गच्छन्तु० ॥ १६ ॥ ब्रह्मस्वहारिणो ये च सुरापा ब्रह्महारिणः । ते सर्वे तृप्तिं गच्छन्तु नील० ॥ १७ ॥ कुब्जाश्च बधिरा ये च पितृमातृकुलोद्भवाः । ते सर्वे तृप्तिं गच्छन्तु नील० ॥ १८ ॥ संसाररहिता ये च रौरवादिषु ये गताः । ते सर्वे तृप्तिं गच्छन्तु नील० ॥ १९ ॥ वृक्षयोनिगता ये च तृण-गुल्म-लतास्थिताः । ते सर्वे तृप्तिं गच्छन्तु नील० ॥ २० ॥ देवत्वं मानुषत्वं च तिर्यक्प्रेत-पिशाचकाः । ते सर्वे तृप्तिं गच्छन्तु नील० ॥ २१ ॥ कृमि-कीट-पतङ्गत्वं गता ये च स्वकर्मणा । ते सर्वे तृप्तिं गच्छन्तु नील० ॥ २२ ॥ रौरवे नरके जाताः कुम्भीपाके च ये गताः । ते सर्वे तृप्तिं गच्छन्तु० ॥ २३ ॥ आसुरीं योनिमुत्पन्नाः पिशाचत्वं च ये गताः ॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

ते सर्वे तृप्तिं गच्छन्तु नील० ॥ २४ ॥ उद्बन्धनरके जाता ऊर्ध्ववक्त्रस्थिताश्च ये । ते सर्वे तृप्तिं गच्छन्तु नील० ॥ २५ ॥ महापातकजान् घोरान् नरकान् प्राप्य दारुणान् । ते सर्वे तृप्तिं गच्छन्तु० ॥ २६ ॥ महाप्रेता महाभागाः पूर्वप्रेतत्वसंस्थिताः । ते सर्वे तृप्तिं गच्छन्तु नील० ॥ २७ ॥ अगम्यागमनं चैव व्रतभङ्गकराश्च ये । ते सर्वे तृप्तिं गच्छन्तु नील० ॥ २८ ॥ जलाग्निभिर्मृता ये च अघोरा धर्मवर्जिताः । ते सर्वे तृप्ति गच्छन्तु० ॥ २९ ॥ इति नीलश्राद्धम् ।

(अथ नीलपुच्छतर्पणम्) ततः सव्येनाऽऽचम्य पूर्वाभिमुखः कुशयवजलान्यादाय । ॐ ब्रह्माद्या देवताः सर्वाः ऋषयो मुनयस्तथा । सर्वे तृप्तिमायान्तु नीलपुच्छेषु तर्पिताः ॥ १ ॥ असुरा देवपत्न्यश्च मातरश्चण्डिकास्तथा । दिक्पाला लोकपालाश्च ग्रहदेवाधिदेवताः । ते सर्वे तृप्तिमायान्तु नीलपुच्छेषु० ॥ २ ॥ विश्वेदेवास्तथाऽऽदित्याः साध्याश्चैव मरुद्गणाः । ते सर्वे तृप्तिमायान्तु नीलपुच्छेषु तर्पिताः ॥३॥ क्षेत्रपीठोपपीठादि नदा नद्यश्च सागराः । ते सर्वे तृप्तिमायान्तु नीलपुच्छेषु तर्पिताः ॥ ४ ॥ पाताले नागपत्न्यश्च नागाश्चैव स-पर्वताः । ते सर्वे तृप्तिमायान्तु नीलपुच्छेषु तर्पिताः ॥ ५ ॥

(याने यवका पिण्ड २९ दे) करे, आगे सव्य होकर आचमन करे, पूर्व मुँह हो कर कुश, यव, जल लेकर 'ब्रह्माद्या'

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

पृथिव्यापश्च तेजश्च वायुराकाशमेव च । ते सर्वे तृप्तिमायान्तु नीलपुच्छेषु तर्पिताः ॥ ६ ॥
पिशाचा गुह्यकाः प्रेताः गणाः गन्धर्वराक्षसाः । ते सर्वे तृप्तिमायान्तु नीलपुच्छेषु तर्पिताः ॥ ७ ॥
दिवि भुव्यन्तरिक्षे च ये च पातालवासिनः । ते सर्वे तृप्तिमायान्तु नीलपुच्छेषु तर्पिताः ॥ ८ ॥
शिवः शिवा तथा विष्णुः सिद्धिर्लक्ष्मीः सरस्वती । ते सर्वे तृप्तिमायान्तु नीलपुच्छेषु तर्पिताः ॥ ९ ॥
तपोधनश्च भगवान् व्यक्ताऽव्यक्तः परमेश्वरः । ते सर्वे तृप्तिमायान्तु नीलपुच्छेषु तर्पिता ॥ १० ॥
क्षेत्रौषधीर्लता वृक्षाः वनस्पत्यादिदेवताः । ते सर्वे तृप्तिमायान्तु नीलपुच्छेषु तर्पिताः ॥ ११ ॥
कपिलः शेषनागश्च तक्षकोऽनन्त एव च । ते सर्वे तृप्तिमायान्तु नीलपुच्छेषु तर्पिताः ॥ १२ ॥
अनेकजलचरा जीवा असङ्ख्याताश्चानेकशः । ते सर्वे तृप्तिमायान्तु नीलपुच्छेषु तर्पिताः ॥ १३ ॥
चतुर्दश यमाश्चैव ये चाऽन्ये यमकिङ्कराः । ते सर्वे तृप्तिमायान्तु नीलपुच्छेषु तर्पिताः ॥ १४ ॥
सर्वे तु यज्ञराजानः पशवः पक्षिणस्तथा । ते सर्वे तृप्तिमायान्तु नीलपुच्छेषु तर्पिताः ॥ १५ ॥
स्वेदजोद्भिजजातीया अण्डजाश्च जरायुजाः । शान्तिदाः शुभदास्ते स्युर्नीलपुच्छेषु तर्पिताः ॥ १६ ॥

ततः कृताऽपसव्यो दक्षिणाभिमुखः पातितवामजानुः यवतिलमोटकवृषपुच्छं च गृहीत्वा

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

इत्यादि श्लोकों से नीलपुच्छतर्पण करे। बाद अपसव्य होके दक्षिण मुँह मोटक, तिल, जल से तीन-तीन अञ्जलि मूल में अञ्जलित्रयेण तर्पयेत्। ॐ स्वधा पितृमातृभ्यो बन्धुभ्यश्चापि तृप्तये। मातृपक्षाश्च ये केचिद्ये चाऽन्ये पितृपक्षजाः॥ गुरु-श्वशुर-बन्धूनां ये कुलेषु समुद्भवाः। ते सर्वे तृप्तिमायान्तु नीलपुच्छेषु तर्पिताः॥ १॥ ये चाऽन्ये लुप्तपिण्डाश्च पुत्रदारविवर्जिताः। ते सर्वे तृप्तिमायान्तु नील०॥ २॥ आब्रह्मणो ये पितृवंशजाता मातुस्तथा वंशभवा मदीयाः। कुलद्वये ये मम वंशभूता भृत्यास्तथैवाश्रितसेवकाश्च॥ ते सर्वे तृप्तिमायान्तु नील०॥ ३॥ मित्राणि शिष्याः पशवश्च वृक्षाः दृष्टाश्च पृष्टाश्चकृतोपकाराः। देशान्तरे ये मम सङ्गताश्च तेभ्यः स्वधाकृत्य इदं ददामि। ते सर्वे तृप्ति०॥ ४॥ ये बान्धवाऽबान्धवा वा येऽन्यजन्मनि बान्धवाः। ते सर्वे तृप्तिमायान्तु नील०॥ ५॥ अकालेऽपगता ये च ये चाऽन्धपङ्गवस्तथा। सर्वे तृप्तिमायान्तु नील०॥ ६॥ विरूपा आमगर्भाश्च ज्ञाताऽज्ञातकुले मम। आमगर्भाश्च ये केचिदागताः पुच्छगोचरे॥ ते सर्वे तृप्तिमायान्तु नील०॥ ७॥ वृषयोनिगता ये च कीट-काक-पतङ्गकाः। ते सर्वे तृप्तिमायान्तु नील०॥ ८॥ किङ्करैः पीड्यते य च सुतरामिक्षुकाण्डवत्। ते सर्वे तृप्तिमायान्तु नील०॥ ९॥ जलेन पीडिताः पङ्के यमदूतैर्महाबलैः। ते सर्वे तृप्तिमायान्तु नील०॥ १०॥ यन्त्रमध्ये

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

प्रपीड्यन्ते प्रेतपीडाव्यवस्थिताः । कुष्ठा-ऽपस्मार-लूतादि-जलोदर-भगन्दरैः । ते सर्वे तृप्तिमायान्तु नील० ॥ ११ ॥ गण्डमाला-पाण्डुरोगैः क्षय-व्याधिमृताश्च ये । ते सर्वे तृप्तिमायान्तु नील० ॥ १२ ॥ कारागृहे मृता ये च सिंह-व्याघ्रहताश्च ये । ते सर्वे तृप्तिमायान्तु नी० ॥ १३ ॥ चाण्डालैर्निहिता मार्गे अशौचशयने मृताः । ते सर्वे तृप्तिमायान्तु नील० ॥ १४ ॥ ब्रह्मस्वहारिणो ये च सुरापाः स्वर्णहारिणः । ते सर्वे तृप्तिमायान्तु नील० ॥ १५ ॥ कुब्जाश्च बधिरा ये च मातृपितृकुलोद्भवाः । ते सर्वे तृप्तिमायान्तु नील० ॥ १६ ॥ संसारहिता ये च रौरवादिषु ये गताः । ते सर्वे तृप्तिमायान्तु० ॥ १७ ॥ सर्पयोनिगता ये च तृणगुल्मलतास्थिताः । ते सर्वे तृप्तिमायान्तु नील० ॥ १८ ॥ देवत्वं मानुषत्वं च तिर्यक्प्रेतपिशाचकाः । ते सर्वे तृप्तिमायान्तु नील० ॥ १९ ॥ कृमि-कीट-पतङ्गत्वं गता ये च स्वकर्मणा । ते सर्वे तृप्तिमायान्तु० ॥ २० ॥ पश्वादियोनिजाता ये वृश्चिकादिषु ये गताः । ते सर्वे तृप्तिमायान्तु० ॥ २१ ॥ आसुरीं योनिमुत्पन्नाः पिशाचत्वं च ये गताः । ते सर्वे तृप्तिमायान्तु० ॥ २२ ॥ उद्बन्धनरके जाता ऊर्ध्ववक्त्रस्थिताश्च ये । ते सर्वे तृप्तिमायान्तु० ॥ २३ ॥ महापातकजान् घोरान् नरकान् प्राप्य दारुणान् । ते

Kirtikant Sharma Collection, Najafgarh
CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

लिखे हुए श्लोकों से तर्पण करे। वृषभ दागने वाले को दगाई द्रव्य देवे। उत्सृष्टा ब्राह्मण लोग 'यत्किंचिद्विजने' इत्यादि सुनावें। अब वैतरणीदान कहते हैं। सब सामग्री के सहित कपिला गौका पूजन और ब्राह्मण का पूजन करे, तीन दफे।

